શ્રી યશોવિજયજી
જૈન ગ્રંથમાળા
દાદાસાહેબ, ભાવનગર.
ફોન : ૦૨૭૮-૨૪૨૫૩૨૨
૩૦૦૪૨૬૫

# श्री संघ कर्तव्यादि बोध.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्रीमद् बुद्धिसागरसूरि ग्रंथमाळा-ग्रन्थांक
नं. ७३-७४-७५-७६-७७

जैनाचार्य्य श्रीमद्बुद्धिसागरसूरिविरचितसंस्कृतग्रन्थो

# ७३ संघकर्तव्य. ७४ प्रजासमाजकर्तव्य.
# ७५ शोकविनाशक. ७६ चेटकबोध.
# ७७ सुदर्शनासुबोध.

---

छपावी प्रसिद्ध करनार,
श्री अध्यात्मज्ञानप्रसारकमण्डल.

हा. वकील शाह मोहनलाल हिमचंद.

मु. पादरा.
( गुजरात )

---

प्रथमा आवृत्ति प्रत ५००

वीर सं. २४५० सने १९२४

विक्रम सं १९८० फाल्गुन पूर्णिमा.

---

किम्मत रु. ०-१२-०

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अमदावाद—शाहपुर नवी पोळमां आवेला श्री प्रजाहितार्थ
मुद्रालयमां पटेल डाह्याभाइ दलपतरामे छाप्युं.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# निवेदन.

श्री अध्यात्मज्ञानप्रसारक मंडळ तरफथी जैनाचार्य श्रीमद् बुद्धिसागरसूरि ग्रन्थमालाना ग्रन्थांक नंबर मणका ७३–७४–७५–७६–७७ तरीके श्रीमद् बुद्धिसागरसूरिविरचितसंस्कृतग्रन्थो अनुक्रमे ७३ संघकर्तव्य ग्रन्थ. ७४ प्रजासमाज कर्तव्य ग्रन्थ. ७५ शोकविनाशक ग्रन्थ. ७६ चेटकबोध. ७७ सुदर्शना सुबोध. छपावी बहार पाडवामां आव्या छे अने तेनी सस्ती पडतर किंमत राखवामां आवी छे, ते ग्रन्थोने सुज्ञो वाचो अने आध्यात्मिक ज्ञान प्राप्त करो तथा आध्यात्मिक तत्त्वज्ञानना रसिकबंधुओ आवा ग्रन्थो छपाववामां आर्थिक सहाय करशो एम प्रार्थवामां आवे छे.

अध्यात्मज्ञानप्रसारक मंडल.

हा. वकील. शाह. मोहनलाल हिमचंद.

मु. पादरा.–( गुजरात )

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# प्रस्तावना.

अस्मत्कृत भजनसंग्रहनवमाभागमां सुदर्शनासुबोध ग्रन्थ गुर्जर भाषामां छपायेल छे. ते संबंधी भजनसंग्रह नवमा भागमांनी प्रस्तावनामां कंइक लख्युं छे, तेनो संस्कृतभाषामां पद्यबंधरचना वि. १९७९ मां विजापुरमां चोमासामां सुधारा वधारा साथे करवामां आवी छे तेमां प्रसंगोपात्त केटलाक श्लोकोनो उमेरो करवामां आव्यो छे. गुजराती पद्योना भाषांतरनो पण संस्कृतश्लोको रचतां केटलेक स्थाने फेरफार करवामां आव्यो छे. संघकर्तव्यग्रन्थ, प्रजासमाजकर्तव्यग्रन्थ, शोकविनाशक अने चेटकबोध ए चार ग्रन्थो भजनसंग्रह दशमा भागमां गुजरातीमां रचेला छपाव्या छे ते चार ग्रन्थोनो संस्कृत भाषामां पद्यमां अनुवाद करतां सुधारो वधारो करवामां आव्यो छे. वाचको गुजराती ग्रन्थो अने संस्कृत ग्रन्थो बन्नेने साथे राखीने वाचशे एटले स्वयमेव सुधारो वधारो समजी शकशे. संघकर्तव्य, प्रजासमाज कर्तव्य, शोकविनाशक, चेटकबोध, अने सुदर्शना सुबोध ए पांच ग्रन्थो विजापुरमां वि. सं. १९७९ ना चोमासामां रचवामां आव्या छे, तेमांना श्लोकोनुं अशुद्धिशुद्धिपत्रक आ साथे आपवामां आव्युं छे. श्री जिनेश्वरसर्वज्ञमहावीरप्रभु भाषित जैनधर्मना श्रुतज्ञानना अनेकनयोनी सापेक्षाओने ध्यानमां राखीने आ ग्रन्थो रच्या छे, छतां तेमां जिनेश्वरप्रभु महावीर देवनी आज्ञाथी जे कंइ विरुद्ध उत्सूत्र लखायुं होय तो तेनो सर्वसंघनी आगळ मिथ्या दुष्कृत दउछुं. सज्जनज्ञानीओ आ ग्रन्थो संबंधीमां भूलचूक संबंधी जे सूचनाओ जणावशे तेनो द्वितीयावृत्तिमां सुधारो वधारो करवामां आवशे. इत्येवं ॐ अर्हं महावीर शान्तिः ३

मु. प्रांतिज. फाल्गुन पूर्णिमा.

ले. बुद्धिसागर.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

## ॥ संघकर्तव्यादिग्रन्थानां शुद्धिपत्रम् ॥

| पृष्ठ | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| २ | १० | १ | सव | सर्व |
| ३ | २२ | ५ | ददत्स्वभोगं संघार्थे, | ददद्भोगं स्वसंघार्थे |
| ३ | २४ | ९ | शंसंजानन् | शमाजानन् |
| ४ | ३० | २ | मोहवारक | मोहवारकः |
| ९ | ८० | १ | माचरत् | माचरेत् |

## प्रजासमाजकर्तव्यग्रन्थः

| पृष्ठ | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| १३ | १९ | २० | प्रकारेदक्षः | प्रकारदक्षः |
| १६ | ४८ | १७ | निराश्रितानां | निराश्रितस्य |
| १५ | ३९ | १९ | ज्योतिषं वहेत् | ज्योति रावहेत् |
| १७ | ५४ | १० | वन्हिः | वह्निः |
| १९ | ७७ | १६ | धर्मं | धर्मे |

## शोकविनाशकग्रन्थः

| पृष्ठ | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| २३ | ११२ | ६ | मात्म्यैक्य | मात्मैक्य |
| २६ | १५ | १९ | भ्राम्यती | भ्राम्यति |
| २८ | २६ | १४ | संधारयः | संधारय |
| २८ | २६ | १५ | संपूरयन् | संपूरय |
| ३० | ३६ | ११ | भवेतदा | भवेत्तदा |
| ३० | ३६ | १३ | यदाऽत्मनो | यदाऽऽत्मनोः |
| ३१ | ४१ | ८ | ऽन्तोनि हिंसा | ऽन्तर्निर्हिंसा |
| ३६ | ७३ | ११ | निरत्ययाऽत्मा | निरत्ययाऽऽत्मा |
| ३३ | ५२ | १० | नियोजिते | वियोजिते |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

## चेटकबोधग्रन्थः

| पृष्टं | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| ४७ | ४ | ३ | वृन्दान्· | वृन्दम् |
| ४९ | १९ | १८ | द्यो स | द्यः स |
| ४९ | १५ | ३ | यः | यो |

## सुदर्शनासुबोधः

| पृष्टं | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| ५५ | २२ | ७ | जैनधर्म | जैनधर्मं |
| ५५ | २२ | ८ | भवाब्धि | भवाब्धिम् |
| ५८ | ३६ | ४ | सदाऽत्म | सदाऽऽत्म |
| ५८ | ३८ | १२ | य मानवास्ते | ये मानवास्ते |
| ५९ | ४२ | १० | सेवा | सेवां |
| ५९ | ४५ | १९ | परीषहादि | परीषहादिं |
| ६१ | ५२ | ३ | नरा | नराः |
| ६३ | ७० | १८ | सुखार्थ | सुखार्थम् |
| ७५ | १५४ | १ | कापटय | कापट्य |
| ६६ | ८४ | १४ | वाङ्नः | वाङ्मनः |
| ६८ | ९९ | १३ | वाङ्नः | वाङ्मनः |
| ७५ | १५९ | १७ | दृष्टया | दृष्ट्या |
| ७० | ११८ | १८ | दण्डयन्ते | दण्ड्यन्ते |
| ७७ | १७४ | १९ | गृह्णन्ति | गृह्णन्ति |
| ७९ | १९२ | १६ | भक्तिमुक्तिश्च | भक्तिर्मुक्तिश्च |
| १०३ | ४२६ | १९ | मुरव्याभ्या | मुख्याभ्या |
| ८१ | २०५ | २ | मद्बाधैर्ये | मद्बोधैर्ये |
| ८१ | २०७ | ५ | धर्मिणः | धर्मिणः |
| ८५ | २४९ | ११ | बुध्वा | बुद्ध्वा |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| पृष्टं | श्लोक | पंक्ति | अशुद्धं | शुद्धं |
|---|---|---|---|---|
| १०२ | ४१५ | १७ | कर्मभ्या | कर्मभ्यां |
| ९३ | ३२९ | १७ | बध्वा | बद्ध्वा |
| १०१ | ४०२ | ११ | गृहाऽवासे | गृहाऽऽवासे |
| १०६ | ४५३ | १७ | बहा | बहौ |
| १११ | ४८५ | ६ | यतद्धि | यत्तद्धि |
| ११५ | ५०६ | ६ | दुखं | दुःखं |
| ११५ | ५०९ | १५ | चेतनाना | चेतनानां |
| ११९ | ५२७ | ८ | अन्धः | चान्धः |
| १२० | ५३४ | १५ | स्वा | स्या |
| १२१ | ५३८ | ११ | सवे | सर्वे |
| १३० | ६१५ | ९ | कार्यै | कार्यैं |
| १३८ | ६८४ | १४ | त्वद्वोधनात् | त्वद्बोधनात् |
| १५० | ७४? | १ | ग च्छेत्क्षणं | गच्छेत्क्षणं |
| १५४ | ७६१ | ४ | दुःस्वदः | दुःखदः |
| १५४ | ७६२ | ६ | गुणाढ्यो | गुणाढ्यो |
| १५६ | ७७२ | ७ | सद्गतिः | सद्गतिः |
| १५८ | ७८२ | ९ | द्गुग. | यद्गुण |
| १६० | ७९३ | ११ | आवि भवति | आविर्भवति |
| १२५ | ५६३ | ५ | प्रभत्रो | प्रभवो |
| १२७ | ५८५ | ९ | पापादुःखं | पापाद्दुःखं |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# धन्यवाद.

आ उपयोगी ग्रंथ प्रसिद्ध करवाने माटे नीचे जणावेल बंधुओए अमने द्रव्य सहाय आपी छे जे माटे ते बंधुओनी धन्यवाद पूर्वक अत्रे नोंध लेवामां आवे छे. भविष्यमां मंडळना अन्य ग्रंथो प्रसिद्ध करवामां सुज्ञ बंधुओ सहायभूत बनशे एम इच्छीए छीए.

१०१) शा. भोगीलाल नगीनदास,
विजापुर हाल पुना.

५१) शा. शंकरलाल भोगीलाल.
विजापुर हाल पुना.

५०) शा. मोहनलाल जेसंगभाइ सदगत् नीमीते
मु. विजापुर.

उपर जणावेल स्वधर्मी बंधुओनो अंतःकरण पूर्वक आभार मानवामां आवे छे,

लेखक,

आत्माराम खेमचंद.

मु. साणंद.

श्री अध्यात्म ज्ञानप्रसारक मंडळ तरफथी.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# भजनसंग्रह भाग १ छपाइ बहार् पडयो छे.

सूरीश्वरजीनी आभ्यंतरभावनाना प्रतिबिंबरूपरसथी छला-छलसुंदर पद्योथी भरपूर आ पुस्तक खरेखर गुजरातना काव्य भंडोळमां अगत्यनो उमेरो करे छे, ते जाणीने खरेखर दरेक गुजरातीने आनंदज थशे. आ संग्रहमां वैराग्य, अध्यात्म ज्ञानचारित्र तथा नीतिना तरंगो छलकाता होवाथी जगत्मां तेनो प्रचार एकदम थवानी जरुर छे. वळी तेओए जैनजगत्ने हालनी मंदावस्थामांथी जागृत करवा सारु अने लोकोने कर्तव्यपरायण करवा-सारु जुदा जुदा पात्रोद्वारा अनेक विषयो चर्ची जैनजगत्ने तद्दन नवी ढबे कर्तव्यदिशानो मार्ग जणाव्यो छे. जेथी जैन जगत् खरेखर प्रगतिशील बनी जशे. अने जैनजगत् खरेखर वखतसरनी कार्यप्रणालिकारूप मार्गमां विचरशे. हालनी स्वराज्य अने स्वदेशनी आध्यात्मिक भावनाने पण आ ग्रंथमां योग्य स्थान मळ्युं छे, एटलुंज नहि पण बाह्य स्वराज्य अने बाह्यस्वदेशनी साथे आभ्यंतर स्वराज्य अने आभ्यंतर स्वदेश के सर्वविश्वजनोनुं परमादर्शध्येय छे, अनेक गूढतत्त्वोथी भरपूर तथा ज्ञाति अने धर्मना भेदभावरहित दरेकने समान उपयोगी आ पुस्तक छे. एक वार वांच्याथी हाथमांथी मूकवानुं मन थशे नहीं. सुंदर पाकुं बाइन्डींग पृष्ठ ५८० किंमत रु. १-८-० पोस्टेज अलग.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# श्री अध्यात्मज्ञानप्रसारक मंडळ तरफथी

## श्रीमद् बुद्धिसागरसूरिजीग्रन्थमाळामां

## प्रगट थयेला ग्रन्थो.

| ग्रथांक | | पृष्ठ | किंमत. |
|---|---|---|---|
| | १ क. भजन संग्रह भाग १ लो. | २०० | ०–८–० |
| * | १ अध्यात्म व्याख्यानमाळा. | २०६ | ०–४–० |
| * | २ भजनसंग्रह भाग २ जो. | ३३६ | ०–८–० |
| * | ३ भजनसंग्रह भाग ३ जो. | २१५ | ०–८–० |
| * | ४ समाधिशतकम्. | ६१२ | ०–८–० |
| | ५ अनुभवपच्चिशी. | २४८ | ०–८–० |
| | ६ आत्मप्रदीप. | ३१५ | ०–८–० |
| * | ७ भजनसंग्रह भाग ४ थो. | ३०४ | ०–८–० |
| | ८ परमात्मदर्शन. | ४०० | ०-१२-० |
| * | ९ परमात्मज्योति. | ५०० | ०-१२-० |
| * | १० तत्त्वबिंदु. | २३० | ०–४–० |
| * | ११ गुणानुराग. ( आवृत्ति बीजी ) | २४ | ०–१–० |
| * | १२–१३. भजनसंग्रह भाग ५ मो तथा ज्ञानदीपिका. | १९० | ०–६–० |
| * | १४ तीर्थयात्रानुं विमान ( आ. बीजी ) | ६४ | ०–२–० |
| * | १५ अध्यात्मभजनसंग्रह | १९० | ०–६–० |
| * | १६ गुरुबोध. | १७४ | ०–४–० |
| *. | १७ तत्त्वज्ञानदीपिका | १२४ | ०–६–० |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| | | | |
|---|---|---|---|
| | १८ गहूंलीसंग्रह भा. १ | ११२ | ०—३—० |
| * | १९–२० श्रावकधर्मस्वरूप भाग १–२ ( आवृत्ति त्रीजी ) | ४०–४० | –१–० |
| * | २१ भजनपदसंग्रह भाग ६ ठो. | २०८ | ०·१२·० |
| | २२ वचनामृत. | ८३० | ०-१४-० |
| | २३ योगदीपक. | ३०८ | ०-१४-० |
| | २४ जैन एतिहासिक रासमाळा. | ४०८ | १—०—० |
| * | २५ आनन्दघनपद ( १०८ ) संग्रह भावार्थ सहित. | ८०८ | २—०—० |
| * | २६ अध्यात्मशान्ति ( आवृत्ति बीजी ) | १३२ | ०—३—० |
| | २७ काव्यसंग्रह भाग ७ मो. | १५६ | ०—८—० |
| * | २८ जैनधर्मनी प्राचीन अने अर्वाचीन स्थिति. | ९६ | ०—२—० |
| * | २९ कुमारपाळ ( हिंदी ) | २८७ | ०—६—० |
| | ३० थी ४–३४ सुखसागर गुरुगीता. | ३०० | ०—४—० |
| | ३५ षड्द्रव्यविचार. | २४० | ०—४—० |
| * | ३६ विजापुरवृत्तांत. | ९० | ०—४—० |
| | ३७ साबरमतीकाव्य. | १९६ | ०—६—० |
| | ३८ प्रतिज्ञापालन. | ११० | ०—५—० |
| | ३९–४०–४१ जैनगच्छमतप्रबंध, संघप्रगति, जैनगीता. | ३०४ | १—०—० |
| | ४२ जैनधातुप्रतिमा लेखसंग्रह भा. १ | | १—०—० |

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

| | | | |
|---|---|---|---|
| ४३ | मित्रमैत्री. | | ०—८—० |
| ४४ | शिष्योपनिषद्. | ४८ | ०—२—० |
| ४५ | जैनोपनिषद्. | ४८ | ०—२—० |
| ४६–४७ | धार्मिक गद्यसंग्रह तथा सदुपदेश भाग १ लो. | ९७६ | ३—०—० |
| ४८ | भजनसंग्रह भा. ८ | ९७६ | ३—०—० |
| ४९ | श्रीमद् देवचंद्र भा. १ | १०२८ | २—०—० |
| ५० | कर्मयोग. | १०१२ | ३—०—० |
| ५१ | आत्मतत्त्वदर्शन | ११२ | ०-१०-० |
| ५२ | भारतसहकारशिक्षण काव्य | १६८ | ०-१०-० |
| ५३ | श्रीमद् देवचंद्र भा. २ | १२०० | ३—८—० |
| ५४ | गहुली संग्रह भा. २ | १३० | ०—४—० |
| ५५ | कर्मप्रकृतिटीकाभाषांतर | ८०० | ३—०—० |
| ५६ | गुरुगीत गुंहलीसंग्रह. | १९० | ०-१२-० |
| ५७-५८ | आगमसार अने अध्यात्मगीता | ४७० | ०—६—० |
| ५९ | देववंदन स्तुति स्तवन संग्रह. | १७५ | ०—४—० |
| ६० | पूजासंग्रह भा. १ लो. | ४१६ | १—०—० |
| ६१ | भजनपदसंग्रह भा. ९ | ५८० | १—८—० |
| ६२ | भजनपदसंग्रह भा. १० | २०० | १—०—० |
| ६३ | पत्रसदुपदेश भा. २ | ५७५ | १—८—० |

नीचेना ग्रन्थो बे त्रण मासमां बहार पडशे.

६४ धातुप्रतिमालेख संग्रह भाग २

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

६५ जैनदृष्टिए ईशावास्योपनिषद् भावार्थविवेचन.

६६ पूजासंग्रह द्वितीयावृत्ति तथा अन्यपूजाओ सहित–
भाग २ बीजो

६७ स्नात्रपूजा. ०–२–०

६८ श्रीमद् देवचंद्रजी अने तेमनुं जीवनचरित्र.

## संस्कृत ग्रन्थो.

नं. ६९ शुद्धोपयोग
७० दयाग्रन्थ
७१ श्रेणिक सुबोध
७२ कृष्णगीता
७३ संघकर्तव्यग्रन्थ
७४ प्रजासमाजकर्तव्यग्रन्थ
७५ शोकविनाशक
७६ चेटकबोधग्रन्थ
७७ सुदर्शनासुबोध.

* आ निशानीवाळा ग्रंथो सीलकमां नथी.

उपरनां पुस्तको मळवानुं ठेकाणुं.

**वकील मोहनलाल हीमचंद.**
( गुजरात ) पादरा.

**शा. आत्माराम खेमचन्द.**
साणंद.

**भांखरीया–मोहनलाल नगीनदास.**
मुंबाइ कोटबजार गेट नं. १९२–९४

**बुकसेलर, मेघजी हीरजी.**
पायधुनी–मुंबाइ.

**शेठ. नगीनदास रायचंद भांखरीया.**
मु. मेसाणा.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# संघकर्त्तव्यग्रन्थः

ईशो जिनो महावीरः संघधर्म मुपादिशत् ।
संघो ज्ञानक्रियाभ्यां सोऽनन्ततीर्थात्मको मतः ॥१॥
संघोहिजङ्गम स्तीर्थः प्रणमन्ति तमीश्वरम् ।
गङ्गातोऽपि महागङ्गा, सर्वधर्माकरो यतः ॥ २ ॥
साधुसाध्वीगणश्राद्ध–श्रावकश्राविकान्वितः ।
संघो ज्ञेय श्चतुर्वर्णी, मुक्ति स्तंपूजयेन्नमेत् ॥ ३ ॥
तीर्थंकरसमः संघः सर्वेतीर्था स्तदन्तरे ।
सङ्घार्चैव प्रभोरर्चा, देवाः संघे सति ध्रुवम् ॥ ४ ॥
सङ्घार्चैव प्रभोरर्चा, न शक्तिः काऽपितत्समा ।
जैनधर्म सजानाति, वर्द्धयत्याऽऽत्मगौरवम् ॥ ५ ॥
संघाज्ञायां ममाज्ञाऽपि, विशत्येतान्निबोधत ।
क्षेत्रकालानुसारेण, यत्कुर्यात् मत्समंचतत् ॥ ६ ॥
यत्क्षेत्रेयत्र कालेवा, धर्मः स्याद्याश्चतत्क्रियाः ।
संघाज्ञयाचताः सन्ति, मदाज्ञायांच मान्ति ताः॥७॥
यत्कर्म संघवृद्ध्यर्थं, सर्वे धर्मा स्तदन्तरे ।
विशन्ति संघसेवासु, तपस्यायमसंयमाः ॥ ८ ॥
निर्जरानन्तपुण्यंच, संघसाहाय्यदानतः ।
व्रतंविनाऽपि संघस्य, देवोऽसौ सेवया भवेत् ॥ ९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सत्वसंघस्य वृद्ध्यर्थं, सङ्केतो जक्तिसेवयोः ।
जक्तिं कुर्वत्सु जक्तेषु, ये मां पश्यन्ति ते प्रियाः ॥१०॥
भक्त्यभिन्नमयि संघेच, न कुर्य्यात्खेदजीह्वियः ।
ईदृशेषु सुभक्तेषु, व्यक्ताऽऽत्मा भगवान् जवेत् ॥११॥
भावेन संघसेवाचेद्, यात्यनन्तभवाघकः ।
संघस्य निन्दकः शत्रुः पापी दुर्गतिभाग् जवेत् ॥१२॥
योजानातिनयान्सप्त, ज्ञान माविष्करोति सः ।
विद्यांसर्वविधांज्ञात्वा, मयि जक्तः स्थिरोभवेत् ॥१३॥
मत्संघ श्चालयत्येव, शासनं सर्वरीतितः ।
असम्यगपि सम्यक्स्यान्, मद्भक्तः सद्गतिं जजेत् १४
सम्यग्दृष्टियुतः संघ, ऋजवस्तस्यदृष्टयः ।
मृषाशास्त्रादिकंतस्य, सम्यग् जवति बोधतः ॥१५॥
ईदृक्संघस्यसेवाभिः सत्वपापक्षयो भवेत् ।
दोषे सत्यपि निर्दोषः संघः सर्वगुणालयः ॥ १६ ॥
मदाज्ञयैव तद्विद्धि, संघो यत् परिवर्त्तयेत् ।
क्रियास्तु परिवर्तते, देशकालानुसारतः ॥ १७ ॥
यत्राऽज्ञानं तमस्तत्र, तत्त्वं न परिवर्त्यते ।
अनादितो हि तत्त्वानि, आचारास्सादिसान्तकाः १८
परिवर्तनशीलाहि, आचारा देशकालतः ।
सर्वसंघे नयापेक्ष–, मते क्लेशं नवाचरेत् ॥ १९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

साम्येन संघ मुक्तिः स्यान्नमोहो मम सेविनाम् ।
विद्याशक्तिप्रचारंच, कुर्वन्संघः प्रवर्द्धते ॥ २० ॥
दुष्टाद्धि व्यसनाद्दूरः संघोऽतीव प्रवर्द्धते ।
न धारयेत्कदापीर्ष्या, क्षममाणः क्षमापयेत् ॥ २१ ॥
ददत्स्वत्नोगं संघार्थं, नीत्याशक्तिं नियोजयेत् ।
गाम्भीर्यौदार्यनीतिष्ठः प्रेमकृच्च परस्परम् ॥ २२ ॥
सहमानः समर्थोऽपि, आराध्यः संघईदृशः ।
रक्तः परोपकारेषु, आसक्तो भक्तिसेवयोः ॥ २३ ॥
ममोपदेशं संजानन्, संघः सत्यगुणान्वितः ।
स्वाऽधिकारेषु यत्कर्म, धर्मं जानँश्चतत्कृतौ ॥ २४ ॥
एवं संघस्य मंतव्यं, यात्याऽऽध्याऽऽत्मिकसद्गतिम् ।
अन्यजीवेदयां कुर्यात्, धर्मिणां प्रीतिमाचरेत् ॥२५॥
सम्मत्यैकीप्रवर्त्तेत, सर्वकार्यैं विवेकवान् ।
दूष्ययुद्धं च संत्यज्य, दृढोगुरुसुरार्चने ॥ २६ ॥
कृत्वा साधर्मिकप्रीतिं, प्राणिहिंसानिवारकः ।
दुष्टं चात्तिमुखे रुन्ध्याद्, दुष्टाऽन्यायादिवारकः ॥२७॥
साधुसंघस्य सम्मानं, कुर्यादाऽऽत्मप्रबोधनम् ।
सज्ज्ञानं सर्वलोकेभ्यो, दद्याद् गर्वं न कारयेत् ॥२८॥
संघः परात्मतामेति, सात्त्विकीं वृत्तिमाचरन् ।
सर्वार्पणं च संघाय, कुर्वन् गर्वं न धारयेत् ॥२९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

बाह्यान्तरं च साम्राज्यं, दध्यान्निष्कामभावतः ।
मनोवचोवपुःशुद्धिं,धारये न्मोहवारकः ॥ ३० ॥
मदिरामांसतो दूरं, क्रूरः स्यान्नाऽपराधिषु ।
अर्पितः स्याच्च धर्म्मार्थे, खादेत्सम्भोज्य धर्मिणः ३१
निरुन्धन् दुष्टवृत्तिंच, शिक्षये दप्यधर्मिणः ।
संघस्य भक्तिसेवार्थे, सप्राणादिनिजार्पणम् ॥३२॥
अन्योऽन्यंमत्समाप्रीति, योगक्षेमौच धारयेत् ।
संघे धर्मे गुरौ देवे, चतुर्षु च निजार्पणम् ॥ ३३ ॥
न स्याद् दुर्व्यसने चेष्टा, स्वाधिकारप्रवृत्तिमान् ।
दध्याद् गुणं त्यजन् दोषं, भवेद्रागीच धर्मिणाम् ३४
विश्वस्मिन् सर्वसंघानां, प्रचारे वपुरर्पणम् ।
स्वाधिकारे गुणस्थान,– गुणकर्मक्रियोद्यतः ॥३५॥
कालं ज्ञात्वा प्रवर्त्तेत, संघ एतादृशो महान् ।
सर्वोन्नतिकराचार–, विचारान् धारयन् गुणी ॥३६॥
सर्वखण्डस्थसंघानां, सेवया जायते जिनः ।
मुक्तो ज्ञानक्रियाभ्यां स्यान्, मत्सदुक्तिविचारवान् ३७
अन्यधर्मिषु न द्वेष्टि, नाऽन्येषां वैरधारकः ।
हिंसामृषाचुरात्यागो, ब्रह्मचारी विरागवान् ॥३८॥
मत्समा सर्वजीवेषु, प्रीति दोषापहारिणी ।
धारयन् वारयन् रोषं, सर्वदोषिषु बोधवान् ॥ ३९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

देशकालाऽनुसारेण, गृहस्थत्यागिनां व्रतम् ।
लक्षयेच्चाऽऽत्मसंशुद्धिं, दक्षो विद्याकलासु च ॥४०॥
ईदृक्संघस्य वृद्धिः स्यात्, सर्वलोकसहायिनः ।
त्रावये जिनमात्मानं, दीनः कर्मोदये च न ॥ ४१ ॥
नाऽन्येषां दुष्टतां कुर्य्यात्, प्रीत्या वैरं च सान्त्वयेत् ।
सम्भोज्य धर्मिणं खादेत्, साहाय्यं धर्मिणां चरेत् ४२
ज्ञानेन वर्जयन् खेदं, भेदवान्नोच्चनीचयोः ।
लघुता दृढता श्रद्धा, प्रेमाऽऽत्मज्ञानमन्तरे ॥४३॥
जीवनं यत्र चारित्र्या-दीदृक्संघसमुन्नतिः ।
क्षुधार्तं भोजयेच्चश्च, तृषार्तं जलमर्पयेत् ॥ ४४ ॥
शक्ते र्दुरुपयोक्ता नो, रोगिणां रोगमाहरेत् ।
दुष्टादाचारतो दूरं, शूरोयः शुभ्रकर्मणि ॥ ४५ ॥
न निन्देच्च परान् किंचि, न्न कंचि दपवादयेत् ।
दूरं कुर्य्याच्च हिंसादिं, विख्यातः संघ ईदृशः ॥४६॥
शुभक्षेत्रादिपोषेण, दोषंत्यक्त्वा गुणं धरेत् ।
दानशीलतपोभाव-, नीतिरीतिप्रवृत्तिमान् ॥ ४७ ॥
विज्ञायनवतत्त्वानि, संघभक्त्या भवेत् प्रभुः ।
गुणकोट्याश्रयः संघ, एव प्रत्यक्ष ईश्वरः ॥ ४८ ॥
प्रभुः साकारसंघोऽस्ति, लोक !!! तत्संगमाचर ।
प्रत्यक्षोहि गुणीसंघः प्रत्यक्षो भगवान् स्वयम् ४९

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आविर्भवतितद्भक्तया, प्रभुराऽऽत्मा स्वमानसे ।
नास्ति कश्चिन्महान् संघात्, खानी यः सर्वधर्मिणाम् ५०
संघोपमा महान् सर्वो, गुणज्ञा नमतार्चत ।
एकतः सकला धर्माः संघसेवनमेकतः ॥ ५१ ॥
भव्या वित्त द्वयं तुल्यं, विधेयं संघसेवनम् ।
एकतः सर्वधर्माःस्यु, रेकतो धर्मिसेवनम् ॥ ५२ ॥
दक्षा वित्त द्वयं तुल्यं, कुरुध्वं संघसेवनम् ।
मार्गानुसारिणः सम्यग्–दृष्टयोऽविरतास्तथा ॥५३॥
गृहस्थाणुव्रतैर्युक्तो, मम संघः श्रियंकरः ।
गृहस्थत्यागिसंघस्य, सेवनात् कर्मणांक्षयः ॥ ५४ ॥
गुरो र्नैदौ गृही त्यागी, महान् त्यागी च सर्वतः ।
त्यागिनः प्रणमेत्पादौ, गृहस्थाःश्रद्धया सदा ॥५५॥
संघो मिलति सत्कार्ये, धर्म्यकार्यं करोति सः ।
संघादिकप्रगत्यर्थं, तत्साम्राज्यं नृपात्परम् ॥५६॥
रक्षेत्संघस्य सर्वाङ्गं, भूत्वा शुद्धप्रभावकः ।
स्यान्निष्कामी च निर्मोही, दोषः संघस्यनोतदा ॥५७॥
प्राणाऽत्ययेऽपिनो द्रुह्ये, च्छुनंकुर्यात्परस्परम् ।
मदर्थं संङ्कटान् सोढा, प्रोल्लासी संघसेवने ॥ ५८ ॥
ये प्राणाः गृहिसंघस्य, मुनिसंघोऽनुमां महान् ।
मत्समंसूरिसाम्राज्यं, धर्मचक्रप्रवर्त्तकम् ॥ ५९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्षेत्रकालानुसारेण, धर्मार्थाः स्युश्चयाः क्रियाः ।
ममाज्ञा निश्चिता तत्र, संघो यत्परिवर्त्तयेत् ॥६०॥
चतुर्धा मिलितः संघ, स्तस्यकार्यंतु मत्समम् ।
कलौ तस्यानुसारेण, जयन्संघः प्रवर्धते ॥ ६१ ॥
क्षेत्रकालानुसारेण, चारोह न्स्वाधिकारतः ।
द्रव्यादिकं परिज्ञाय, मत्संघोऽस्ति सदाजयी ॥६२॥
यः संघः सर्वदेशेषु, तद्यात्राभिर्भवेद्गुणी ।
प्रतिवर्षं चरेद्यात्रां, चरस्थावरतीर्थयोः ॥ ६३ ॥
संघभक्तिं यथाशक्ति, कुर्वतां सिद्धिरुद्भवेत् ।
योगक्षेमविधाता सः श्रद्धाप्रेमी गुरौ मयि ॥ ६४ ॥
विधर्मिप्रतिपक्षिषु, शुद्धस्नेहविधायकः ।
दुष्प्रपञ्चै र्न वञ्च्यः स्या, न्नेच्छेद् दुष्टजनाऽशुभम् ६५
संघोजीवतिसम्मत्या, नीत्याऽनङ्गश्च सद्गुणी ।
कदाचित्तत्रनो धर्मः कर्म यत्संघहानिकृत् ॥ ६६ ॥
धर्मे सत्यप्यधर्मोऽसौ, कर्म यत्संघपातकृत् ।
तत्र धर्मो यतोवृद्धिः संघस्य देशकालतः ॥ ६७ ॥
संघो वर्द्धेत यत्कार्यात्, धर्मः स्यात्सर्वदाततः ।
जानन्ति ते मदाज्ञाज्ञा, मदाज्ञैव शिवङ्करा ॥ ६८ ॥
यएवं वेत्तिशक्तोऽसौ, भक्तः संघ स्तु मत्प्रियः ।
संघे पुरस्सरोज्ञानी, संघप्रगतिकारकः ॥ ६९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यदाऽज्ञानी प्रधानं स्यात्, संघघात स्तदा भवेत् ।
ज्ञानं देहि तु संघेभ्यो, धार्मिकव्यावहारिकम् ॥७०॥
गृहिसंघ श्चतुर्वर्णो, गुणकर्मानुसारतः ।
वर्तिस्वाऽऽज्ञानुसारं मे, धर्मं कुर्याच्छमाप्नुयात् ७१
भावै रुपशमाद्यैस्तु, स्वाऽऽत्मधर्मस्समुल्लसेत् ।
संत्यज्य सर्वथा मोहं, मुक्तिं गच्छेच्चिदात्मिकाम् ॥७२॥
आत्मैव परमाऽऽत्मा स्याद्, ध्येयः संघस्य चेदृशः ।
आविर्भवति संघस्य, ध्येयमेवं स्वभावतः ॥ ७३ ॥
मोहकर्म परित्यक्तु, मात्मज्योतिः प्रकाशय ।
आदर्शसाध्यदृष्टिर्हि, संघस्य सर्वदा मता ॥ ७४ ॥
सहर्षं धर्मिणं पश्येत्, दृष्ट्वोत्कर्षं प्रकाशयेत् ।
परस्परं महाप्रेम, धारको धर्मिरक्षकः ॥ ७५ ॥
दुःखे परस्परं भाग, मादातुं रागमुन्नयेत् ।
मेले कोऽपि न भेदःस्या दर्पितः स्यात्परस्परम् ॥७६॥
संघसेवां स्वसेवां हि, ज्ञात्वा कुव्यसनं त्यजेत् ।
संघाज्ञापालने मृत्यु, माप्नुयात्स्वार्पणाप्रियः ॥७७॥
साधर्मिकाय न द्रुह्ये, न्न मुह्ये न्नामरूपयोः ।
साधर्मिको यदागच्छे, त्सोल्लासंस्वागतंचरेत् ॥ ७८ ॥
संघाऽवज्ञाश्चनो कुर्या, न्मानयेच्छ्रमणादिकम् ।
कृत्वा धर्मिण मेवान्यं, खादेत्संश्राव्य देशनाम् ॥७९॥

द्विड्रागौ हर्त्तुं मन्यस्य, न्मयि विश्वासमाचरेत् ।
मुक्तोमां शरणीकृत्य, साधून् नत्वा च नक्षयेत् ॥८०॥
निर्भिस्वातंत्र्यसाम्राज्यं, वहीराज्य मवाप्नुयात् ।
संघो भदन्तसाकारः समष्टिव्यष्टिशक्तिमान् ॥ ८१ ॥
संघनाशान्महापापं, दुःखमाविर्भवेद्भृशम् ।
संघारि दुर्गतिं याया, न्नाद्यात्संघहारवम् ॥ ८२ ॥
भवेत्पूर्णोन्नतिः प्राप्त्या, त्यागिसंघशुभाशिषः ।
संघनाशो हि मन्नाशो, ज्ञात्वा संघानुगो भव ॥८३॥
संघः सागरगम्भीरो, जुष्ट्वा वीरो नव स्वयम् ।
यत्काले यच्च योग्यं स्या, त्कर्त्तव्यं तद्विवेकतः ॥८४॥
ज्ञानिनां सम्मतं यत्स्यात्, योग्यं तत्परिवर्त्तनम् ।
संघदाससमा ज्ञेया, श्चक्रीन्द्राद्याः स्वभक्तितः ॥८५॥
कुर्वंति संघसेवां ते, देवाः संघे सति स्थिराः ।
विद्यादिकगुणश्चेत्स्या, त्तदा संघो न दुःखभाक् ॥८६॥
संघः सदैव मत्पश्चाद्, वर्तिता स्याच्छिवप्रदः ।
संघः शक्तिं विना नश्ये, न्मदाज्ञाभ्रष्टजीवनः ॥८७॥
मदाज्ञां धारयेद्यश्च, संघोऽसौ न पतेत्क्वचित् ।
मच्छ्रद्धयाखिलाशक्ति, रात्मा यातिपरात्मताम् ॥८८॥
शरणे मयि यश्चैति, तदाचारोऽस्ति मुक्तिदः ।
जिनो रागाद्विषोजेता, जैनास्तदनुयायिनः ॥ ८९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मोहादिहननाचारो, जैनधर्मः स वर्त्तते ।
जैनधर्मधरः संघः साधकोऽन्ताश्चिदाऽऽत्मनः ॥ ९० ॥
शुद्धयर्थं सर्वजीवानां, जैनधर्मोऽस्ति पावकः ।
साधकश्चाष्टयोगानां, जैनधर्मी वरोऽस्त्यसौ ॥ ९१ ॥
साधुश्रावकधर्मोऽयं, गुणस्थानकधारकः ।
असंख्यदृष्टयो भान्ति, मद्धर्मेऽपेक्षयासह ॥ ९२ ॥
मतमार्गाभिदः सर्वे, मद्धर्मे भान्ति दृष्टयः ।
चतुर्विधोऽस्ति मे संघो, ह्यसंख्यदृष्टिधारकः ॥ ९३ ॥
असंख्यदृष्टौ सापेक्षे, जैनो नास्ति कदाग्रही ।
मिथ्यामोहमतित्याग, आत्माऽऽनन्दो विरक्तिता ९४
ज्ञानं भक्तिश्च सद्योगो, भोगेसाति विरागता ।
दुःखे सुखे समत्वं च, निरासक्तिश्च शुद्धता ॥९५॥
न मोहः कर्मणः पाके, न द्रोहः सकलाऽऽत्मसु ।
आत्मवत्सर्वजीवानां, द्रष्टासंघोऽस्ति शान्तिदः ॥९६॥
विश्वोद्धारश्च सज्ज्ञाना, द्दयोपकृतिसद्गुणैः ।
भेदभावो न लोकेषु, सर्वलोकहितंकरः ॥ ९७ ॥
परोपकृत्क्रियां कुर्वन्, मत्सत्यं ज्ञप्तिबोधयन् ।
मनुष्यजातिमुद्धर्तुं, शान्तो दान्तोऽथसंयमी ॥९८॥
पारतंत्र्यकरं कर्म—वारयन् धर्मधारकः ।
ईदृक्संघसमुत्क्रान्ति, र्निजदोषनिवारिका ॥९९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

राजप्रजोपकारादि–, कर्म कुर्वन् स्थिराशयः।
आत्मन्येव सुखंमन्ता, संघो वैदेहवान्जयी ॥१००॥
दर्शनज्ञानचारित्र–, धरस्संघश्चतुर्विधः।
क्षेत्रकालाऽनुसारेणा–पवादोत्सर्गमामृशन् ॥ १०१ ॥
संघकृत्यंचरन् संघः सर्वशक्तिप्रकाशकः।
स्वाधिकारेण कर्त्तव्यं, कुर्वन् जयति भूतले ॥१०२॥
भाषितं संघकर्त्तव्यं, ज्ञानिभिर्हृदि धारितम्।
सम्यग् ज्ञात्वानरा नार्यः शान्तिं पुष्टिं च विन्दत १०३
महावीरस्य सद्बोध–, पालने मोहरोधनम्।
संघसेवाऽभिधोग्रन्थः कृतोबुद्ध्यब्धिसूरिणा ॥१०४॥
संघसेवा सदाभूया त्सर्वमङ्गलदायिनी;
चतुर्विध महासंघो, जीयात्सर्वत्रशर्मदः ॥ १०५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# प्रजासमाजकर्त्तव्यग्रन्थः

जिनेश्वरो महावीरः श्रेणिकं प्रत्यबोधयत् ।
प्रजासत्यस्वरूपं य–,ज्ज्ञात्वानक्लेश माप्नुयात् ॥१॥
वृद्धभूपसतां मानं, मातापित्रो र्विशेषतः ।
परस्परंचसाहाय्यं, सेवाभक्तिः शुभंकरा ॥ २ ॥
परस्परस्यरक्षार्थं, सङ्केत स्तनुसत्तयोः ।
राज्यसर्वाङ्गविज्ञानं, परार्थे प्राणवर्जनम् ॥ ३ ॥
न्यायेन धनसम्प्राप्ती, राष्ट्रनीत्या प्रवर्त्तनम् ।
धर्मार्थे स्वार्पणं सर्वं, प्रभुतायां नगर्विता ॥ ४ ॥
अन्यप्रजासु दुःखस्य, विनाशाय प्रवृत्तयः ।
अनीतिं न सहेताऽपि, क्लेशोनैव परस्परम् ॥ ५ ॥
परस्परं न च द्रोह, श्चौर्यं लुण्टं न कारयेत् ।
राजाऽऽदेशस्य सम्मानं, प्रजाः कुर्वन्ति भावतः ॥६॥
राजाज्ञांनातिरस्कुर्य्या, न्न्यायं दंडं सहेतच ।
पक्षपाताद्वसन् दूर–, मात्मज्योतिः प्रकाशयेत् ॥७॥
प्रजासंघैकतां कुर्व, न्नीतिमार्गं न वर्जयेत् ।
राज्योन्नातिविधातारो, जीवन्ति सद्व्यवस्थिताः ८
विकाश्य सर्वशक्तीश्च, धर्मार्थे तद्व्ययं चरेत् ।
जीवनं च विना शक्तिं, क्षेत्रं स्वामिनमन्तरा ॥९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दययादमसत्याभ्यां, वृद्धि र्दानेनजायते ।
न्यायैक्यसत्यविज्ञानैः प्रजासंघोऽश्नुतेसुखम् ॥ १० ॥
अन्यप्रजाश्च जानीयाद्, यो निजाऽऽत्मसमा नरः ।
मम भक्त्या तथा प्रीत्या, स्यात्प्रजाऽसौगुणालयः ११
वर्जयन् दुर्गुणान् दोषा, न्धर्मकार्य्यं समाचरेत् ।
व्यसनाद् दूरतः स्थित्वा, साम्राज्यंलभते प्रजा ॥१२॥
न हिंस्या न्मोहतोलोका, न्पापाचारं न कारयेत् ।
सदाचारै र्नरा नार्यो, लभन्ते परमोन्नतिम् ॥ १३ ॥
द्रव्येण क्षेत्रकालाभ्यां, भावेन योग्यकर्म यत् ।
स्वाधिकारेचयत्कुर्य्या, त्सत्यप्रगति माप्नुयात् ॥१४॥
बाह्यजीवोन्नते र्हेतुः स्वाऽधिकारेणयोमतः ।
धर्मार्थं धारयेत्सैव, प्रजा जीवति नाऽपरा ॥ १५ ॥
ज्ञानेन सेवया भक्त्या, वर्त्तते च प्रजोन्नतिः ।
कदाऽपिनास्तिकः संघो, विन्तेशक्तिं न सात्त्विकीम् १६
जैनधर्मं च सेवेत, यथाशक्तिं स्वमुन्नयेत् ।
धर्मकर्माऽऽत्मशुद्ध्यर्थं, धारयेत्स्वस्यमानसे ॥ १७ ॥
कलानांशिक्षणज्ञानं, प्राप्नुयाद्धार्मिकीप्रजा ।
मदाज्ञया धरेद्धर्मं, मोहनीयादिकं त्यजेत् ॥ १८ ॥
नस्यात्पराजितो दुष्टै, र्धृत्वा बलकलादिकम् ।
सर्वप्रकारे दक्षःस्या, दाऽऽत्मशुद्धिं च लक्षयेत् ॥१९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वर्त्तेताऽऽत्मोपयोगेन, जोगेतु योग आन्तरः ।
विनाऽऽसक्तिं प्रभुंप्राप्य, प्रजाजीवनमुत्तमम् ॥ २० ॥
सेवते त्यागिनः प्रीत्या, आत्मानः सत्तयाजिनाः ।
विज्ञायाऽर्हत्पदं याति, दूरीभूय च पापतः ॥ २१ ॥
ब्राह्मणाः क्षत्रिया वैश्या, शूद्रास्स्वस्वक्रियापराः ।
स्वस्वगुणाश्रयास्तेस्युः प्रजात्वशक्तिधारकाः ॥ २२ ॥
पशुपक्ष्यादिकेष्वात्म-, बुद्धिं धारयति प्रजा ।
सर्वविश्वजनैः सार्द्धं, सभक्तिश्चाऽऽत्मशुद्धिमान्॥२३॥
आत्मशुद्धिकृते कर्म, राज्यमप्याऽऽत्मशुद्धये ।
प्रजा एवं च जानाति, तत्रराष्ट्रसमुन्नतिः ॥ २४ ॥
हिंसाऽऽदिकचुरात्यागो, व्यभिचारस्य वर्जनम् ।
रिक्तप्राणा च धर्मार्थे, प्रजा तु तादृशी शुभा ॥२५॥
सद्गुणायाऽस्ति साम्राज्यं, सद्गुणायक्रियाऽखिला;
प्रजाजानाति या चैवं, तस्याः राष्ट्रतनुर्बली ॥२६॥
धर्मार्थे मर्पयेत्प्राणा, न्प्रजा चैवं गुणालयः ।
न दुष्टप्रजया वध्या, धर्म्ययुद्धेन शोभना ॥ २७ ॥
जीवच्छक्तीस्तुताः याति, सर्वशत्तया न गर्विणी ।
चतुर्वर्णा गुणैः कार्य्यैं, र्व्यक्तभावेन तत्रते ॥ २८ ॥
प्रजासंघसमुत्क्रान्ती, र्यान्ति ते श्रद्धयामम ।
प्रजासंघस्तु सत्कार्य्यैं, र्बलं भवति कार्यतः ॥ २९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जैनधर्मे चतुर्वर्णी,–प्रजा भवति शक्तिदा ।
प्रेमाऽन्यप्रजया सार्द्धं, योगक्षेमौ चधारयेत् ॥ ३० ॥
बलवान्वाङ्मनोकायैः प्रजासंघोऽत्रजीवति ।
राज्ञे राज्याय धिक्कारं, ददत् किञ्चिन्न वर्द्धते ॥३१॥
नाशयन् राज्यराजादिं–, प्रजासंघः पतेद्ध्रुवम् ।
चेद्द्रुह्येद्राजभूमिभ्यः पतेद्राजप्रजाततः ॥ ३२ ॥
सत्यन्यायैर्युतं राज्यं, तत्पातः पक्षपाततः ।
उपकारो दया दानं, क्षमौदार्यविमर्शनम् ॥ ३३ ॥
वर्त्तते संयमः प्रेम, योगः क्षेमोऽपितत्रहि ।
प्रजा प्रवृत्तिशीलाऽस्ति, तल्लक्ष्यं निवृतिः परम् ॥३४॥
चातुर्वर्णः प्रजासंघो, ज्ञानमानन्द माप्नुयात् ।
वर्णः कर्मगुणैर्ज्ञेय, श्चतुर्वर्णीप्रजा भवेत् ॥ ३५ ॥
स्वाधिकारे गुणं कर्म, धृत्वा मद्धर्म माप्नुयात् ।
विवेकिनीच निर्लेपा, प्रजा मुक्तिं समश्नुते ॥ ३६ ॥
आत्मशुद्धिं प्रकुर्वन्ती, पूर्णशुद्धिपदं वहेत् ।
आत्मोपयोगतः कर्म–, कुर्वन् धर्मः प्रवर्त्तते ॥३७॥
बन्धोनाऽऽत्मोपयोगेन, प्रजा वाऽन्धः कदापि न ।
कर्म कुर्य्यात्स्वकर्मस्या, दाऽऽत्मशुद्धोपयोगतः ॥३८॥
निस्सारयेदहंवृत्तिं, प्रजा मज्ज्योतिषं वहेत् ।
दर्शनज्ञानचारित्र्य–योगेन सत्यमुक्तता ॥ ३९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निर्मोहः सर्वभोगेषु, प्रजासंघः सुखं श्रयेत् ।
चतुर्विधः प्रजासंघ, आत्माऽऽनन्दं प्रकाशयेत् ॥४०॥
मदाज्ञाशुद्धतांयाति, स्वयमेव प्रभुर्भवेत् ।
स्वाऽधिकारेण हिंसाया, स्त्यागश्चैव विरागता ॥४१॥
स्वाधिकारव्रतादीनि, धारयन्ति प्रजाः शुभाः ।
सर्वजीवेषु सन्मैत्री, धारयन्ती सुकर्मिणी ॥ ४२ ॥
जीवेष्वाऽऽत्मसमा दृष्टिः स्वर्गीया सा प्रजा मता ।
व्यष्टिसमष्टिसाम्राज्यं, तस्य सत्यप्रवृत्तयः ॥४३ ॥
यत्रहार्दं शुभंतत्र, प्रजा सत्यशुभंकरा ।
वर्णधर्मस्य भेदेन, नैवक्लेशो न युद्धता ॥ ४४ ॥
धर्मभेदेन भेदो न, स्वर्गिणी तादृशीप्रजा ।
अपराधं सहेतारे, रेकोऽन्यं प्रेमतः स्पृहेत् ॥ ४५ ॥
भिन्न्याभ्नो देशभेदैश्च, चर्मरंगस्य भेदतः ।
धर्मश्रद्धां परांदध्या, त्यजेत्क्लेशकरीं मतिम् ॥ ४६ ॥
सर्वमाऽऽत्मस्वरूपेण, पश्येद्गर्वं न धारयेत् ।
बुभुक्षुंभोजयित्वाऽद्यात् तृषार्त्तं वारि पाययेत् ॥४७॥
निराश्रितानां संरक्षां, कुर्य्यात्क्रुध्यान्न कोपतः ।
रोगिणे चौषधं दद्यात्, सतां मानं समाचारेत् ॥४८॥
सत्ताधनेषु भोगर्वो, न ज्ञाने सत्यहंक्रिया ।
ईदृग्नरास्तथा नार्य, श्चित्ते स्वर्गप्रकाशकाः ॥४९॥

साऽपेक्षयाऽखिलं मंत्रं, चतुराचारतत्परा ।
व्यवस्थया च वर्त्तेत, प्रजैवमतिवर्द्धते ॥ ५० ॥
साहाय्यं दुःखिनां दद्या, न्नेच्छेल्लक्ष्मी मनीतितः ।
भावान्मध्यस्थकरुणा–, मैत्रीमोदाँश्च धारयेत् ॥५१॥
विषयेषु न मुग्धास्या, त्प्रजा पुष्यति शक्तितः ।
आत्मानन्दे सदामग्नो, दूरतो भोगशर्मतः ॥ ५२ ॥
अपेक्षयाऽखिलान्धर्मा, न्विद्यात्कर्माप्यपेक्षया ।
सापेक्षं दर्शनंमार्गे, ज्ञात्वाऽऽत्मसरणींवहेत् ॥ ५३ ॥
अल्पदोषो महान्धर्मो, हितंज्ञात्वैव माचरेत् ।
यथा धूमावृतोवन्हिः प्रवृत्तिर्दोषिणी तथा ॥ ५४ ॥
स्वप्रवृत्त्या प्रवर्त्तेत, शुद्धात्मानि मनःक्षिपेत् ।
प्रजैवं ज्ञानिनी यत्र, तत्र शान्तिसुखादयः ॥ ५५ ॥
जीवेदात्मविशुद्ध्यर्थं, संकेतोऽपेक्षयाऽखिलः ।
अनेकान्तविचारज्ञो, निश्चयव्यवहारविद् ॥ ५६ ॥
असंख्यनयसापेक्षै–, र्योगैर्हि मुक्तिरुद्भवेत् ।
ज्ञानशीला प्रजा सा स्या, द्या प्रजा ब्रह्मदर्शिनी॥५७॥
बाह्यराज्यं तु तद्धेतुः पारम्पर्य्येण कथ्यते ।
आजीविकादिहेत्वर्थं, भूपादीनां व्यवस्थितिः ॥५८॥
आत्मैव परमात्माऽस्ति, मोहनाशात्प्रकाशते ।
शुद्धाऽऽत्मराज्यसाध्याय, बाह्यराज्यस्य हेतुता ॥५९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्मराज्ये यदाजीवे, ह्याह्यराज्येऽपिशान्तिभाक् ।
यत्र सापेक्षया ज्ञानं, न पक्षो न कदाग्रहः ॥ ६० ॥
वर्त्तेतान्तश्च साम्यंचे, त्तदानिस्संगताध्रुवम् ।
एतादृशी प्रजा यत्र, तत्र राजाऽपिशोभनः ॥ ६१ ॥
प्रबलोऽस्ति प्रजासंघो, मोहराजपराजयात् ।
मद्बोधेन प्रजाश्रेष्ठा, सुखं मद्बोधवर्त्तिनाम् ॥ ६२ ॥
मदाज्ञावर्त्तिनो ये च, परानन्दं प्रविन्दते ।
ऐक्यवृत्तिः प्रजारूपे, प्रामाणिकप्रवर्त्तनम् ॥ ६३ ॥
अन्योऽन्य मुपकारी स्या, दात्मैक्येशुद्ध मुत्तमम् ।
वर्त्तेत योगसम्मत्या, न क्लेशो देशधर्मयोः ॥ ६४ ॥
पश्येत्सर्वत्र मां सत्तया, स्यात्तस्य सफला क्रिया ।
ईदृक्प्रजा भवेद्यत्र, तत्र व्यक्तो भवेत्प्रभुः ॥ ६५ ॥
आत्मज्योतिः प्रकाशेत, प्रजाजीवनमुत्तमम् ।
मद्यादिव्यसनत्यागो, मतभेदे न खिन्नता ॥ ६६ ॥
हिंसायज्ञप्रचारो न, शान्तिस्तत्र प्रजागणे ।
वसेन्मांशरणीकृत्य, मज्जापैर्जीवनं वहेत् ॥ ६७ ॥
मद्विश्वासं दृढंदध्या, त्सा प्रजाशान्ति माप्नुयात् ।
अनन्तशक्तिपूर्णोऽहं, पारं कैर्नापिपार्यते ॥ ६८ ॥
मद्रूपीभूयमद्भक्ता, मत्पदंयान्ति भक्तितः ।
ज्ञायते निजदोषो न, विनिपातस्तु दुर्गुणैः ॥ ६९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सद्गुणैरुन्नतिः शान्ति, र्मद्भक्तानां सदाऽभवेत् ।
न मोहो नामरूपेषु, स्वाधिकारप्रवर्त्तनम् ॥ ७० ॥
वर्द्धेत हृत्सरो हर्षे, मद्रूपं यान्ति मज्जनाः ।
व्यष्टिसमष्टिसद्वीरं, ज्ञात्वा मां मत्प्रियोजनः ॥७१॥
दोषं त्यक्त्वागुणीभूय, सत्प्रजा मत्पदंव्रजेत् ।
त्यजेच्च विकथां निन्दा, मात्मनःसद्गुणान्भजेत् ॥७२॥
क्षमां याचेत दोषस्य, मनःशुद्धिं समाचरेत् ।
राज्यनीतिः शुभाज्ञात्वा, राजानं नापमानयेत् ॥७३॥
दुष्टाऽधर्मिनृपं दूरं, कृत्वा शान्तिं वहेत्प्रजा ।
दत्ते न लातिनोलक्ष्मीं, स राज्यनीतिपालकः ॥७४॥
न्यायेन जीविकावृत्तिः स्वोपयोगेन जीवनम् ।
ईदृग्भव्यप्रजा यत्र, तत्रानन्दः प्रवर्त्तते ॥ ७५ ॥
पापयुक्ता प्रजादुष्टा, भवेद् दुःखेनपीडिता ।
पृथक् स्याद्धर्मकर्मभ्यां, हृष्यात्पापं विधाय या ॥७६॥
सतां या द्वेषिणी दुष्टा, सा प्रजा दुःखसंवृता ।
देवे धर्मे गुरौ प्रीतिः पुण्यं धर्मशुभक्रिया ॥ ७७ ॥
भूपप्रजासु यत्रैवं, तत्र नस्यु र्विपत्तयः ।
त्यजेद्व्यसनिवस्तूनि, शास्त्रभावं च वेदयेत् ॥ ७८ ॥
वितण्डावादकलहं, त्यजेच्चान्तरवैरताम् ।
सत्वरजस्तमोवृत्ते रात्मा भिन्नोऽस्ति सत्तया ॥ ७९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अतो मोहादिनाशार्थं, योगाभ्यासं वहेज्जनः ।
प्रजैवं ज्ञानिनी यत्र, क्षेमो योगश्च तत्र हि ॥ ८० ॥
अहंत्वंवृत्तिनिर्भिन्नः कुर्वन्नपि च निष्क्रियः ।
आसक्ति मन्तराकर्त्ता, शुद्धाऽऽत्मानं प्रपद्यते ॥८१॥
सर्वाऽऽत्मानं स्ववत्पश्ये, त्सास्वर्गीया प्रजा स्मृता ।
आत्मैव परमात्मा स्या, दात्मवीरः प्रकाशते ॥८२॥
स्यादाऽऽध्यात्मिकसाम्राज्यं, यत्रनीतिमयी प्रजा ।
यादृक् प्रजा भवेत्तत्र, तथादण्डादिरीतयः ॥ ८३ ॥
कर्मरीत्या सुखं दुःखं, कर्मन्यायैः शुभाशुभौ ।
कर्मणा भवचक्रंतु, प्रजाभूपव्यवस्थितिः ॥ ८४ ॥
कर्मबन्धो न सज्ज्ञाना, यत्र तत्र न चान्धता ।
अग्निवदाऽऽत्मबुद्धानां, निरासक्तिः स्वकर्मसु ॥८५॥
यत्र तु त्यागिनो वर्णा, जायन्ते ज्ञानिनस्ततः ।
नामरूपेषु नो मोहो, लोकाः प्रभुमयास्ततः ॥८६॥
आत्मज्ञानस्य शिक्षाभिः, प्रजा भवति सात्त्विकी ।
आत्मज्ञानं विनात्वन्धा, भूपालोकाश्चनिर्गुणाः ॥८७॥
हिंसाचुरा च युद्धं च, प्रजासंघे न वर्त्तते ।
शान्तिस्तुष्टिश्च पुष्टिश्च, व्यक्तानन्दः समुद्भवेत्॥८८॥
राजाज्ञया प्रजावृत्तिः प्रजाभूपेषु धर्मिता ।
द्वयोरैक्यं भवेद्यत्र, तत्र ज्ञानंच शान्तिता ॥ ८९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कषायवृत्तिसंरोधो, दोषाणां वारणंतथा ।
यत्र प्रजासुसत्यैक्यं, तत्र स्वर्गीयशान्तयः ॥ ९० ॥
प्रजाभूपेषु चेदैक्यं, तत्र नो दुष्टवञ्चनम् ।
यथारवे स्तमोनश्ये, त्तथारीणां पराजयः ॥ ९१ ॥
धर्मिषु चेत्पतेद्धाटी, विनश्येत्सापितच्क्षणम् ।
दयासत्यं च रागश्च, व्यक्ता भवन्तिशान्तिदाः॥९२॥
मयि धृत्वामनोलोका मद्रूपं यान्ति मत्पराः ।
कर्मबन्धं न ते यान्ति, स्वाधिकारांक्रियापराः ॥ ९३ ॥
मज्ज्ञा मन्मनसो लोकाः शुद्धब्रह्मोपयोगिनः ।
मत्परा मरणांजित्वा, जैना यान्तिंजिनंपदम् ॥ ९४ ॥
सुखस्य जीवनं तत्र, यत्राऽऽत्मज्ञानिनो जनाः ।
गृहस्थत्यागिनो ब्रह्म ज्ञात्वा संयान्ति मत्पदम् ॥९५॥
प्रारब्धे र्व्यवहारस्तु, जवत्येव सतांमतः ।
एकोऽन्यं वञ्चयेन्नैव, न कुर्य्यात्पापघोषणाम् ॥९६॥
एकोऽन्येषांशुजार्थे च, स्वकीयं जीवनं वहेत् ।
दध्यात्साम्यं सुखेदुःखे, ज्ञानानन्दरसंरसन् ॥९७॥
एवं विश्वमनुष्याः स्यु र्नैव तत्राऽस्ति बन्धनम् ।
विकशे दाऽऽत्मसाम्राज्यं, मत्पदं लभतेप्रजा ॥९८॥
मयितस्मिँश्च भेदो न, ज्ञानानन्दः समुल्लसेत् ।
स्वाधिकारेण यत्कर्म, नाऽधर्मस्तत्कृतौ भवेत् ॥९९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उत्सर्ग मपवादं च, ज्ञात्वा कर्त्तव्यमाचरेत् ।
प्रजा जानन्ति यत्रैवं, तत्र साम्राज्यमात्मनः ॥१००॥
अल्पदोषोमहान्धर्मो, तत्कार्यं च समाचरेत् ।
अल्पधर्मं महादोषं, तत्कार्यं न समाचरेत् ॥१०१॥
कर्मणोऽतीततां प्राप्य, सिद्धः स्यादायुषःक्षये ।
केचिद्भव्या दिवं यान्ति, नृभवं यान्ति केचन ॥१०२॥
पुण्येन शान्तिपुष्टीस्तः तुष्टिश्च द्रव्यज्ञानतः ।
पापमार्गा विनश्यन्ति, मद्भक्ता ये च मत्समाः॥१०३॥
क्षेत्रकालानुसारेण, प्रजासंघप्रवृत्तयः ।
ज्ञात्वा कुर्य्यु र्नरा नार्य्यः पूर्णानन्दं च विन्दते ॥१०४॥
जैनधर्मं च विज्ञाय, प्रमाणं स्यात्प्रजाक्रिया ।
ज्ञात्वा सापेक्षया धर्मं, स्वाऽधिकारेण वर्त्तताम् ॥१०५॥
परस्परं प्रजासंघै र्भूपैश्च देशमोहतः ।
वित्तादिमोहतो युद्धं, कर्त्तव्यं न कदाचन ॥१०६॥
अन्यदेशादिलोभेन, हिंसायुद्धं निपातकृत् ।
अशक्तधर्मिरक्षार्थं, धर्म्ययुद्धादिकं श्रयेत् ॥ १०७ ॥
स्वाऽऽत्मदेशादिरक्षार्थं, धर्मयुद्धं च धर्मिणाम् ।
अल्पदोषमहाधर्मं, विवेकेन प्रवर्त्तते ॥ १०८ ॥
दुष्टभूपप्रजादिभ्यः स्वाऽऽत्मसंघादिरक्षणम् ।
कर्त्तव्यं हृदि मां धृत्वा, धर्म्ययुद्धादिकर्मभिः॥१०९॥

विज्ञाय मत्समान्विश्व–, जीवान्मैत्र्यादिभावतः ।
विश्वस्य सर्वजीवेषु, दृश्योऽहं ब्रह्मवेदिभिः ॥ ११० ॥
हिंसाद्यधर्मयुद्धानि, देशरङ्गादिमोहतः ।
धर्मान्धरागतो भक्तैः कर्त्तव्यानि न सज्जनैः ॥१११॥
धर्मादिभेदभिन्नानां, विश्वस्थसर्वदेहिनाम् ।
सार्धमाऽऽत्म्यैक्यभावेन, वर्त्तनं शान्तिशर्मदम् ॥११२॥
आहारादिसमुत्पाद्यं, न्यायसंपन्नवित्ततः ।
मृषास्तेयादिकं त्यक्त्वा, स्वकीयं जीवनं वहेत्॥११३॥
सूरिवाचकसाधूनां, साध्वीनां च विशेषतः ।
सेवाभक्तिः सदा कार्या, आहारादिप्रदानतः ॥११४॥
श्रेणिक ! ! त्वां प्रजाकार्यै, राज्यं समुपादिष्टवान् ।
भूपानामपि भूपानां–, त्यागिनां राज्यमाऽऽत्मनि॥११५॥
त्वं स्वाधिकारतो गच्छ, शुद्धाऽऽत्मोल्लासमाप्नुहि ।
विज्ञापय प्रजाकार्य्यं, मार्य्यत्वोल्लासलब्धये ॥११६॥
श्रेणिकं बोधयामास, हर्षो भूपप्रजास्वभूत् ।
प्रणमन्ति प्रभोः पादौ, प्रभुं स्मृत्वा शमाप्नुयुः॥११७॥
वीरप्रभोश्च सद्बोधे, कृते मोहो निरुध्यते ।
जायते परमानन्दो, मङ्गलानि पदे पदे । ॥११८॥
प्रजासमाजकर्त्तव्य–ग्रंथोऽयं चारु निर्मितः ।
सर्वविश्वोपकाराय, बुद्धिसागरसूरिणा ॥११९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# शोकविनाशकग्रन्थः

प्रणम्य श्रीमहावीरं, सर्वज्ञं जिनशेखरम् ।
करोमि तत्प्रबोधाऽऽत्म–, ग्रन्थं शोकनिवारकम् ॥१॥
सिद्धार्थभूपे जनके दिवंगते,
स्वर्गं गतायां त्रिशलाख्यमातरि ।
लेभेऽथ शोकं हृदये सुदर्शना,
शोकं तथाऽवाप स नन्दिवर्धनः ॥ २ ॥
देशे तथा ज्ञातिगणे कुटुम्बे,
शोकः परं व्याप प्रजागणेषु ।
श्रीमन्महावीरमनोऽन्तराले,
भृशंतरां भावदयाऽऽविरासीत् ॥ ३ ॥
स बोधयामास च नन्दिवर्धनं,
तथा कुटुम्बान्पुरवासिमानवान् ।
शुक्संनिरोधो वरबोधतोऽभव,
त्तथा यथा सन्तुतुषुश्चतेजनाः ॥ ४ ॥
मातुः पितुश्च मरणेन कथं स्वचित्ते,
शोकं परं वितनुषे म्रियते न चाऽऽत्मा ।
सर्वाऽऽत्मनां मिलति याति तनुः स्वभाग्या,
दायुःक्षये गमनशम्बलमस्ति धर्मः ॥ ५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

हे नन्दिवर्द्धन सुदर्शन इत्यवेहि,
देहादतीव पृथगस्ति किलायमाऽऽत्मा ।
सम्बन्ध एष खलु कायकृतोऽस्ति मिथ्या,
तस्मान्नशोककरणेन भवेद्धि किञ्चित् ॥ ६ ॥
चेद्वेत्सि मातरमथः पितरं शरीरं,
किंरोदनं निपतनेन तनोस्तदत्र ।
दृष्टो जडः पुनरसौ क्षणिकोविनाशी,
तस्मान्न शोककरणेन भवेद्धि किञ्चित् ॥ ७ ॥
देहानवाप्य सकलान्विकलाननन्तान्,
सन्त्यज्य तानपि समागत एष आत्मा ।
नो हन्यते स खलु कैरपि हन्यमानः,
तस्मान्न शोककरणे फलमस्ति किञ्चित् ॥ ८ ॥
आत्मा जनन्या जनकस्ययो वा,
न मार्यमाणोऽपि कदाऽपि मर्त्ता ।
चारित्र्यमेत्येह विभूय सिद्धः,
स शाश्वते स्थास्यति सिद्धलोके ॥ ९ ॥
आत्मा जनन्या जनकस्ययो वा,
सचाऽन्य देहे स्थितिमापनूनम् ।
तद्वर्त्तमानेतिशरीरनाशात्,
कथं स्वचित्ते विदधासि खेदम् ॥ १० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

[illegible] निर्दिशन्ति,
[illegible] वत्स्युः ।
[illegible] परिवर्त्तयेच्चेत्,
[illegible] स्वयमेव विधेयः ॥ ११ ॥
न [illegible] विधुरस्येह कदापि शोकं,
[illegible] निर्मितं च सदात्मनाऽऽत्मा ।
[illegible] यदि मोहतयापि मिथ्या,
[illegible] निर्मितं कुरुते स्वकीयम् ॥ १२ ॥
[illegible] रागानुगानां,
[illegible] ।
[illegible] रागानुगानां,
[illegible] स्वकीयम् ॥ १३ ॥
[illegible],
[illegible] धर्मेषु परां प्रवृत्तिम् ।
[illegible] यास्ति,
अ[illegible] स्वर्गवृति [illegible] ॥ १४ ॥
देहं [illegible] च निश्चितमथो तेषां तनूत्सर्जनं
मा [illegible] विस्तार [illegible] मानवजवे धर्मस्य संधारणम् ॥
सम्यक् चैतदवेहि मोहपरिणाम्याऽऽत्मा भवेत्राप्स्यती
संसारासुन[illegible] आत्मपरिणाम्याऽऽत्मा परंमुच्यते १५

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शोकं मा [illegible] :
पर्य्याया इति पुद्गलस्य [illegible] ः ॥
रुप्यात्किं मृतकाय [illegible] ः
संयोगोऽस्ति यतस्त [illegible] ः १६

इन्द्रजालसमाः सर्वे, [illegible] ।
वारयन् रागरोषौ च, आत्मा [illegible] महान् ॥१७॥

वसन्त मात्मानमदःशरीरे,
शरीरतो भिन्न मवेहि बन्धो, ।
त्वमाऽऽत्मनः सम्प्राति पूर्णशुद्धधा ।
प्रमाणय प्रार्थितमोक्षसिद्धिम् ॥ १८ ॥

किं नामरूपेषु करोषि मोहं
न वर्त्तसे त्वं ननु नामरूपम् ।
नाशोऽस्ति रूपस्य तथा च नाम्नो
ब्रह्माविनाशीत्यवगच्छ बन्धो ॥ १९ ॥

नवत्य भून्नाम तथा च रूपं
ततः पृथग् वर्त्तत एव चाऽऽत्मा ॥
जडं न चाऽऽत्मान मवेहि बन्धो
जडेषु किं प्रेम सदाऽऽत्मनास्यात् ॥ २० ॥

न भेदभावोऽस्ति कदापि चाऽऽत्मनो
जडस्य भेदोऽस्ति हि पुद्गलस्य च ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सम्बन्धिनं वा किमु मानये जडं
किं तत्र मत्कं किमुवा भवेत्तव ॥ २१ ॥
मोहेन देहसम्बधो ज्ञानेन पुनराऽऽत्मनः ॥
सम्बन्धं ये न जानन्ति, सम्बन्धः कश्च तैः सह॥२२॥
मोहेन स्वार्थसम्बन्धो महत्ता नाऽस्ति भूतले ।
स्वार्थैः सम्बन्धिने रोदः केवलं सच मूर्खता ॥ २३ ॥
सम्बान्धिनो जगति ये च समं शरीरै
भ्रान्तास्तु संसृतितले जडमोहतस्ते ॥
सम्बन्धिनः पुनरहो सममाऽऽत्मना ये
निर्मोहिनश्च जगति भ्रमवर्जितास्ते ॥ २४ ॥
एष देहस्य सम्बन्धो देहावधिरथोमृषा ।
सम्बन्धे क्षणिके मोहं प्राप्य मूढो न जायताम् ॥२५॥
सन्ध्याविद्युदिवाम्बु बुद्बुद्समं संसारसम्बन्धनं
मिथ्या वा क्षणनश्वरं मनासितच्छोकं न संधारयः ॥
मायां वारय मानवं भवमिमं व्यर्थं न सम्पूरयन्
भ्रातःसम्प्रतिसावधानमनसा स्वाऽऽत्मा परं ध्यायताम्२६
आत्मोपयोगतो ध्यानं कुरु भ्रातर्निजाऽऽत्मनः ।
आत्मैव परमात्माऽस्ति ज्ञानानन्दः स शोजते ॥२७॥
संसार एषोऽस्ति महानसारः
सारः पुनश्चास्त्ययमाऽऽत्मधर्मः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

न कश्चिदायाति निजेन सार्द्धं
रोषश्च रागश्च निवार्यतां तत् ॥ २८ ॥
सत्याऽऽत्मतत्त्वं प्रविचार्य्य मन्ये
संसारमध्ये त्वयमास्ति सारः ॥
स्वपापपुण्यक्रियया भवोऽन्यः
सार्द्धं समागच्छति जन्मकाले ॥ २९ ॥
पुण्योदये जायत एव सौख्यं
पापोदये जायत एव दुःखम् ॥
पुण्योदयेनाऽऽलभते मनुष्यो
धर्मस्य सर्वोपकरं मनोज्ञम् ॥ ३० ॥
पापोदयेनाऽऽलभते मनुष्यो
दुःखस्य सर्वोपकरं दुरन्तम् ॥
स्यात्पुण्यतो देवमनुष्ययोनिः
पापेन लभ्यं नरकादिदुःखम् ॥ ३१ ॥
न पापकर्म क्रियतां यतस्ते
पुण्येन धर्मेण च सौख्यमिष्टम् ॥
आशांस्वमोक्षस्य विधाय नूनं
पुण्यंविधेहि व्यवहारतस्त्वम् ॥ ३२ ॥
आत्मा चिरं भावय चित्तदेशे
प्रादुर्भवत्येव स आत्मधर्मः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मच्चिन्तने तत्परचेतनःस्या
मुग्धो नचस्या ननु नामरूपे ॥ ३३ ॥
पुण्यं पापं द्वे दशे पुद्गलानां
पूर्वं छायावत्परं तापतुल्यम् ॥
ज्ञानानन्दौ दर्शनंचाऽऽत्मधर्मौ
लोकेसारं केवलं चाऽऽत्मतत्त्वम् ॥ ३४ ॥
भिन्नोऽय माऽऽत्माजडदेहतोऽस्ति
प्रवर्त्तते चाऽऽत्मविनिश्चयोऽयम् ॥
देहोजडस्तत्पृथगस्ति चाऽऽत्मा
विचारतो भ्रान्ति रपैति दूरम् ॥ ३५ ॥
भवेतदाऽऽत्मा निजकर्मकर्त्ता,
यदासचाऽन्यत्परिणामवान्स्यात् ॥
यदाऽत्मनोऽसौपरिणामवान्स्या
त्तदा स आत्मा निजधर्मकर्त्ता ॥ ३६ ॥
मोक्षस्तु तत्कर्मवियोगतस्स्या
न्मोक्षस्य हेतुः पुनरस्तिसत्यम् ॥
सद्दर्शनज्ञानचारित्रकृत्यं
द्रव्येण भावेन च विद्धि सत्यम् ॥ ३७ ॥
धर्मस्य देवस्य गुरोश्च पूर्णं,–
श्रद्धैव सम्यक्त्वमिहप्रदिष्टम् ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अनन्तजन्माऽऽगतहेतुरूप–
ग्रन्थेर्वियोगो भवतिस्त्ववश्यम् ॥ ३८ ॥
अष्टौ कर्माणि जानीहि, द्रव्यकर्म सुनिश्चितम् ॥
द्विड्रागौ भावकर्मोऽस्ति, तनुर्नोकर्म केवलम् ३९
निस्सृतं द्रव्य नोकर्म, निस्सृते भावकर्मणि ॥
कृत्स्नकर्मक्षयो मोक्षो, बन्धो तद्विद्धि निश्चितम् ४०
दुष्टवृत्तौच रुद्धायां, व्यापारः शुभवृत्तिकः ।
जायते धर्मयोगोऽन्तो, निर्हिंसाचारवृत्तिकः ॥ ४१ ॥
विलोक्यमाने खलु दुःखिजीवे,
प्रजायतेऽसौ करुणाप्यऽपारा ॥
धर्म्ये दयाकर्मणि संप्रवृत्ते,
प्रादुर्भवत्येव परोपकारः ॥ ४२ ॥
उदयति नहि हिंसा वृत्तिरल्पाऽपिचित्ते,
उदयति यदि किञ्चिच्छान्ति मायाति शीघ्रम् ॥
ध्रुव मवितथशान्तिब्रह्मचर्यैं र्भवानां,
निचितमखिल कर्माणि स्वरोधं लभन्ते ॥ ४३ ॥
सन्तोषे वर्त्तितां चित्तं, न रागो विषयेष्वपि ।
प्रातिकूल्ये नहि द्वेषः समस्त्यागोऽथ उद्भवेत् ॥ ४४ ॥
द्वेषस्सगुरुषु नो भवेत्पुनरिह स्तां शुद्धबुद्धिक्षमे,
सेवातो गुरुदेवयोः स्वहृदये स्यादाऽऽत्म शुद्धिस्तथा ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गृह्णन्त्याऽऽत्मविशुद्धिहेतुनिवहं ये भावतो द्रव्यतः,
वैदेहाःकिल ते भवन्त्यपितनौ मोहोऽस्तुतेषांकुतः ४५

निराऽऽत्मजडतत्त्वानां, ममतालीयते स्वतः ।
नाहंकारो जडेषु स्या, ज्जडोजाड्येन वर्त्तते ॥ ४६ ॥

आत्मोपयोगे परिणामवाँश्चेत्
आत्मा तदाऽसौ लभते हि मुक्तिम् ॥
शोकादिकं तद्व्यवधूय शीघ्रं,
धर्मे प्रवृत्तिं कुरु नन्दिबन्धो !! ॥ ४७ ॥

आत्मोपयोगिनि तथाऽपगते च मोहे,
नो जायते मनसि कोऽपि शरीरशोकः ॥
संजायते किमपि शुद्धमपारधैर्य,
लोकेषु सारमिह केवल माऽऽत्मतत्त्वम् ॥ ४८ ॥

अज्ञानेनाऽऽत्मतत्त्वस्य च–
निजहृदये जायते मोहवेगः,
त्वं चाहं चेतिवृत्तिर्नहि जड–
विषये जायते चाऽऽत्मबोधात् ॥
शीघ्रं कामस्य वेगो विलय–
मतितरां याति सामूलचूडं,
तस्मा ल्लोकेषु सारं जविक !!–
विजयते शुद्धमाऽऽत्मैकतत्त्वम् ॥ ४९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रोदंरोदं मृत्यु मायान्ति सर्वे
लब्ध्वा मृत्युं कोऽपि नाऽऽयाति पश्चात् ।
ये जानन्त्याऽऽत्मस्वरूपं स्वचित्ते
तेषां शान्ति र्जायते सत्यसिद्धा ॥ ५० ॥

ज्ञात्वातत्त्वविनिश्चयं कुरुत वा शान्तं तथा स्वं मनः,
धर्म्ये चाऽध्वनि गच्छतां नच भवेत्काश्चिन्नमिथ्याभ्रमः॥
जीवा अन्यभवेषु कर्मगतितिर्निर्गच्छन्ति भुञ्जन्ति वा,
स्वेषां कर्मविपाकमेव नियतो न्यायः सखे वर्त्तते ५१

कर्माऽऽत्मसङ्गोऽयमनादिकालात्,
नियोजिते कर्मणि चाऽऽत्मतत्त्वात्
प्रादुर्भवत्येव हि शुद्धतत्त्वम्,
लोकेषु सारं स्फुरदाऽऽत्मतत्त्वम् ॥ ५२ ॥

आत्मज्ञानी न बध्नाति, कर्म कर्मकरोऽपिसन् ।
आत्मोपयोगतश्चाऽस्ति, धर्म आसक्तिवर्जितः ॥५३॥

अज्ञानी निर्बलोऽतीव, ज्ञानीतु बलवान्महान् ।
कर्मयोगी तु सम्भूय, ज्ञानी कर्मान्त माचरेत् ॥५४॥

सम्यज्ज्ञानी त्वकर्मा स्या, त्कुर्वन्सर्वाः क्रिया अपि
अपुनर्बन्धतां याति, आत्मधर्मं च गच्छति ॥५५॥

आत्मन्येवाऽऽत्मधर्मोऽस्ति दर्शनज्ञानरूपकः ।
वीर्यानन्तस्वरूपोऽस्ति, कर्मनाशात्प्रकाशते ॥ ५६ ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तिरोभूतगुणानां हि, प्राकट्यं कर्मनाशतः
सत्तया ये गुणास्सन्ति, प्रादुर्यान्ति त आत्मनि ॥५७॥
सुव्यक्ततां यान्ति महात्मनस्तु
व्यक्ता न ये ते खलु सन्त्यसन्तः ॥
सतामभावो न कदापि काले,
व्यंक्तुं समर्था न असत्पदार्थाः ॥ ५८ ॥
जानीहि ताना॒ऽऽत्मगुणा न्सतस्त्वं ।
पर्य्यायतो वाप्यथ सत्तया वा ॥
न नाश मायाति कदाऽपिकाले
बन्धो चिदाऽऽनन्दमयस्स आत्मा ॥ ५९ ॥
मात्रादिकानां सर्वेषा, मात्मद्रव्यंतु सत्स्मृतम् ।
आत्माऽहं त्वं स नित्योऽस्ति, अनित्यं वपुरादिकम् ६०
देहेषु निवसश्चाऽऽत्मा, न त्रिकालेऽपि नश्यति ।
तस्य सम्बन्ध मासाद्य, किं शोकस्य प्रयोजनम् ॥६१॥
देहास्तु वस्त्रवत्सन्ति, आयान्ति च प्रयान्ति च ।
तेषामस्ति न सम्बन्धः सत्यं जानीत बन्धवः ॥६२॥
शुद्धाऽऽत्मभावतो विद्धि, सार्द्ध मायाति नो जडः ।
आत्मैकाकी समायाति, न मोहे तर्हि मोहनम् ॥६३॥
स्वस्य धर्मं गृहाणाऽऽत्मन्, जडेषु ममतांत्यज ।
शुद्धभावेन मोक्षोऽस्ति–, कर्मबन्धो विभावतः ॥६४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सुताः षष्टिसहस्राणि, मृताः सर्वेऽपि चैकदा ।
मुमूर्च्छ सागरश्चक्री, वैराग्यज्ञानतोऽतरत् ॥ ६५ ॥
बहुवर्ष मयापयच्छुचा मरुदेवी निजपुत्रमोहतः
अजवद्गतमोहिनी यदा क्षणतो मुक्तिपुरी मथाविशत् ६६
रामो मृतो हेति जगाद देवः
श्रीलक्ष्मणप्रीतिपरीक्षणार्थम् ।
निशम्य हा भ्रातरिति ब्रुवाणो,
जहौ शरीरं नृपलक्ष्मणोऽपि ॥ ६७ ॥
केनाऽपि सार्द्धं न च कोप्यगच्छ,
त्स्वंस्वं च वाटं सकला अगच्छन् ।
राजा महान्रावणसन्निभोऽपि,
प्राणांश्च हित्वा नरकंजगाम ॥ ६८ ॥
कर्मानुसारं परयोनिमायात्,
भावी न संयात्यपसारितेऽपि ।
येऽकम्पयन्क्ष्मामपि पादघातै,
स्तेऽपि प्रयाता अथच प्रयान्ति ॥ ६९ ॥
तेषां शरीरस्य नचाऽपि नाम्नो,
न वर्त्ततेऽपि स्मृति रत्रकाले ।
असंख्यकालस्य जिनेश्वराणा
मद्याऽपि तावन्नच नामतस्थौ ॥ ७० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

न देहतः कोऽप्यमरो बभूव
किं कर्तुमिष्टोऽस्ति तदाऽत्र मोहः ।
अद्यावधि नाम तथा च देहो,
जातोऽस्त्यनन्तो गणने न गण्यः ॥ ७१ ॥

समुद्रवीचीनयवद्वपुस्तु
त्वया न शोकाचरणं विधेयम् ।
सम्बन्धिनां नाम यथाच देह
स्तथाऽऽत्मनोऽप्याब्धितरंगवत्तौ ॥ ७२ ॥

हेनन्दिबन्धो श्रुणु सत्यबोधं,
प्रसाद्य चित्तं स्मर शुद्धतत्त्वम् ॥
अलक्ष्यनिर्जन्मनिरत्ययाऽत्मा,
निर्मोहभावेनस चिन्तनीयः ॥ ७३ ॥

महिष्यः कृष्णचन्द्रस्य
त्राहि त्राहीत्यघोषयन् ।
न कोऽपि तास्ततोऽरक्षी
द्विचित्राकर्मणांगतिः ॥ ७४ ॥

ऐन्द्रजालिकसंकाशे
कर्मणी द्वे शुभाऽशुभे ।
नाऽऽत्मभावं ततो धेहि
वस चाऽऽत्मस्वभावतः ॥ ७५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कृष्णद्वैपायनाख्यो मुनिरथ-
विपिने, साम्बप्रद्युम्नबालैः
सञ्जातोपद्रवस्सन् तनुमपि
विसृज, न्नग्निदेवो बभूव ॥
ग्रामं ग्रामं ससर्वां सगृहजनधनां
द्वारिकां संददाह,
ध्वंसंचक्रेच तस्या जलनिधिसलिले
कोऽप्यरक्षन्न तस्मात् ॥ ७६ ॥
आत्मज्ञानेन चात्माऽऽयं, बली जवति कर्मणः ॥
क्षणेनाऽनन्तकर्माणि, नश्यन्ति सच्चरित्रतः ॥ ७७ ॥
आयुस्तुतन्नश्यति जायते च,
प्रमोदशोकौ न ततो विधेयौ ।
स्या आत्मभावेन सदा प्रसन्नः,
कुर्य्यादशेषं तु मनोमायिस्यात् ॥ ७८ ॥
नार्य्यो नरा मच्छरणागता ये
ते चोत्तरेयुर्भवसिन्धुपारम् ।
देहं त्यजन्शोक मथो न कुर्य्या ।
त्कदाऽपि नो रोदरवंप्रकुर्य्यात् ॥ ७९ ॥
श्वासोच्छ्वासैः पूर्णमद्ध्यायकानां
सत्यं ज्ञानं जायते हृत्प्रदेशे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्वासोच्छ्वासै मंज्जपे तत्पराणां
किञ्चित्पापं चित्तलग्नं नहि स्यात् ॥ ८० ॥
अन्तेऽपि यो देहविसर्गकाले ।
प्रपद्यते मां स नरो विदेहः ।
अनन्तजन्मार्जितपापनाशो ।
मुक्तिर्ध्रुवं मच्छरणागतानाम् ॥ ८१ ॥
अजोऽविनाशीच महाननन्तो
नित्यस्तथाऽनादिरथ प्रपूर्णः
आत्मा सवीरः परमेश्वरः स्या ।
त्सिद्धोप्यसावेव च सत्तयाऽस्ति ॥ ८२ ॥
शुद्धाऽऽत्मवीरंशरणं विधाय
संशोध्य चित्तं सच शुद्ध आत्मा ।
षट्कारकै र्याति यदा च शुद्धिं ।
तदा स आत्मैव भवेत्पराऽऽत्मा ॥ ८३ ॥
यो हृष्येदाऽऽत्मभावेन, बन्धं नायाति कर्मणाम् ।
आत्मानं न जडे पश्ये त्स्याच्छुद्धाऽऽत्मा स निर्ममः ८४
विदेहो देहसत्त्वेऽपि, नाऽस्ति कालोऽपि मज्जनान् ।
दुर्गतौ नाप्नुयाद्दास, मायु रानन्दतः क्षिपेत् ८५
स्वाऽधिकारेण कर्माणि, कुर्वतां निर्जरा भवेत् ।
स्वाऽधिकारेण कर्माणि, कुर्वाणा विन्दते शिवम् ८६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

देहो म्रियेताऽपि स नो विनश्ये
त्किञ्चिद्भयं स्यान्न च मृत्युकाले
प्राणान्त्यजेन्निर्भय एव भूत्वा
भक्ता हि मे धामशिवं लभन्ते ॥ ८७ ॥

मम विश्वासिनो ये च, येषां प्रेम मयि स्थिरम् ।
महापापकृतश्चाऽपि, लभन्ते ध्यानतः शिवम् ॥८८॥

समग्रजीवोद्धृतये भवो मे
संकेतित स्तीर्थकरेति नाम्ना ॥
वर्तध्व मेतत्प्रविचार्य्य नार्यो
नराश्च निर्लिप्य हि कर्म कुर्युः ॥ ८९ ॥

नार्यो नरा मच्छरणागता ये
जन्मानि तेषां सफलानिसन्ति ॥
निजाऽऽत्मशुद्धिं समवाप्य तेऽपि
स्युर्ज्ञानिनो योगिजनाश्च भक्ताः ॥ ९० ॥

वर्णादयो ये च मनुष्यवर्गाः
स्वं कुर्वते कर्म दिवं लभन्ते ॥
देहं विमुच्याऽऽशु सुखं लभन्ते
क्लेशं लभन्ते न भवे परस्मिन् ॥ ९१ ॥

मनोमयि न्यस्य नराश्च नार्य्यः
प्रवर्तयेयु र्भवमुत्तरेयुः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उत्तारिता ये नहि चाऽन्यदेवै
र्मद्भक्तितस्ते भव मुत्तरन्ति ॥ १२ ॥

आत्मकर्म विविदुः प्रजागणा,
नन्दिवर्धनसुदर्शनादयः ॥
शान्तिमापुरवधूय हृच्छुचं ।
ज्ञानतः प्रभुमथो प्रतुष्टुवुः ॥ १३ ॥

दृष्टान्तै र्दशभिस्तु दुर्लभतरं लब्ध्वा भवं मानवं
ज्ञानाद्याऽऽत्मगुणप्रशोधनकृते संसाध्यतां पौरुषम् ॥
वारम्वारमयं न मानवभव स्संजायते देहिनाम्,
दृष्टान्ते मधुबिन्दुतुल्यविषये नो मोहनीयं त्वया १४

अनादिकाला न्मनुजादिकानां
देहाश्च भूताश्च तथा भवन्ति ॥
मृदादितो ये प्रभवन्ति देहा ।
स्ते मृत्तिकाद्येषु हि संविशन्ति ॥ १५ ॥

लोको जन्मजरामृतिप्रभृतिभि र्दुःखैरलं पूरितः
नोपारं विषयप्रभूतसुखतत्तृष्णामहावारिधेः ।
आत्मज्ञानविरक्तिताभिरथ यो जागर्त्ति नो तन्मृतिः,
यो शेते पुनरत्र मोहविषये तज्जन्ममृत्यू ध्रुवम् १६

आगारोमम मेधनं परिजनो राज्यं च देशश्चमे
एतादृग् ममताभिरत्र भुवने बद्धोऽस्ति रागद्विषोः,

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ज्ञानानन्दमयः परात्परतरः साऽऽत्माऽस्ति देहस्थितः
जीवो वेत्ति न तं वधूप्रभृतिभि स्सत्यं सुखं मन्यते ९७

आत्मा नश्येन्नैव कालत्रयेऽपि
पर्याया ये पुद्गलानां जडानां।
नानारूपैस्ते भवन्ति प्रकामं
पश्चात्पश्चात्ते च नष्टा भवन्ति ॥ ॥ ९८ ॥

जाताःप्रागृषभाद्यो जिनवराः पूर्वे त्रयोविंशतिः
ते वै केवलबोधतो जगदिदं जाग्रत्तरं चक्रिरे।
दीक्षां प्राप्य तथाऽहमप्यथ सखे श्रीकेवलज्ञानतः
अज्ञानाच्छयनाद्धि जागृततरं विश्वं करिष्ये ध्रुवम् ॥९९॥

दृश्याजडा ये जगतः पदार्था
याता न यास्यन्ति स मंच कैश्चित्
तदत्र दृश्ये हि पदार्थमात्रे
मोहो विधेयो भवता न बन्धो ॥ १०० ॥

स्याच्छातावेदनं पुण्यैः पुण्यं पुण्येनकर्मणा।
अशातावेदनं पापैः पापं पापेनकर्मणा ॥ १०१ ॥

पूर्वमासन्पदार्था ये तेनासन्वर्त्तमानवत्।
अद्य ये चापि दृश्यन्ते, ते भविष्ये न भाविनः॥१०२॥

जगत्पदार्थाः क्षणिका अनित्याः
संसारमध्ये शरणं न किञ्चित्।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पूर्णोऽस्ति दुःखैरभितो भवोऽयं
सैकाकिजीवो हि समेति याति ॥ १०३ ॥

सन्त्याऽऽत्मभिन्ना हि जडाः पदार्था
देहोऽशुचिः सोऽपि ततो विभिन्नः ।
मिथ्यात्वरागाऽविरतिद्विषाद्यै
र्दोषै र्भवत्येव हि कर्मबन्धः ॥ १०४ ॥

मिथ्यात्वरागाविरतिद्विषां स,
त्संरोधतः सम्वरनामतत्त्वम् ।
अनेकरीत्या तपसः क्रियाभि,
स्तत्त्वं भवेत्तत्खलु निर्जराख्यम् ॥ १०५ ॥

अनाद्यनन्तषड्द्रव्य–, मयोलोकः प्रवर्त्तते ।
शाश्वतो द्रव्यरूपेण, पर्य्यायैः सोह्यशाश्वतः ॥१०६॥

सम्यज्ज्ञानमतीवदुर्लभतरं संसारघोरार्णवे,
स्याद्वादप्रतिबोधकृज्जिनवरप्राप्ति र्महादुर्लभा ।
जैनोधर्म इहास्त्यनन्तसमयात्काले तथाऽनन्तकेऽ–
वश्यं स्थास्यति नन्दिवर्द्धन सखे जानीहितन्निश्चितम्
॥ १०७ ॥

अनेकवारं सह सर्वजीवै,
र्मात्रादिसम्बन्ध इहानुभूतः ।
निजः परोवेति तु तत्र मोहै,
र्ज्ञानी न मोहं कुरुते कदापि ॥ १०८ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पीतानि सर्वाब्धिजलानि जीवैः
संभक्षिताः पार्थिवपुद्गलाश्च ।
आत्माऽवबोधं च विना स्वतोषं,
जाता न तेषां सुखशान्त्यवाप्तिः ॥ १०९ ॥

येऽङ्गीकरिष्यन्त्यथ जैनधर्मं
समेत्य ते मुक्ति मनन्तकालम् ।
सुखेषु वत्स्यन्ति तदत्र कार्य्यै
दृढं मनः शाधि सुदर्शने त्वम् ॥ ११० ॥

अनन्तकालचक्राब्धि, मुक्तो भवितुमाऽऽत्मनः ।
ज्ञानदर्शनचारित्रा–, ण्येव सम्यगुपासय ॥ १११ ॥

आत्माऽभिन्नस्तथानित्यो, ज्ञानानन्दस्वरूपकः ।
आत्मन्यस्ति स वै धर्मः कर्मभिस्स तिरोहितः॥११२॥

तीर्थंकराणा मृषभादिकानां,
सतांत्रयोविंशतिसंख्यकानाम् ।
आप्तश्चतुर्विंशतितीर्थकर्त्ता,
अहं महावीरजिनोऽवतीर्णः ॥ ११३ ॥

मातापितृजने दिवंप्रतिगते नन्द्यादिपौराङ्गनान्,
जैनंधर्ममुपादिशन्मृतिभवच्छोकापहारक्षमम् ॥
दीक्षाम्प्राप्य समेत्य केवलिदशां संस्थाप्य तीर्थं निजं,
विश्वानुद्धृतवान्नसौ मम महा–वीरो विदध्याच्छिवम्॥११४

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ईशो महावीर उदात्तधीरो
जिनः परब्रह्म च देवपूज्यः ।
तीर्थंकरोऽयं भवतोऽवतारः
समग्रविश्वोद्धरणाय जातः ॥ ११५ ॥

अल्पाऽपि चिन्ता न चचार चित्ते
शोकोगतः क्लेशचयोऽपि नष्टः ।
माता पिता द्वौ च दिवं प्रयातौ
च्युत्वा तयो मुक्तिरथो विदेहे ॥ ११६ ॥

देवदेवीशिरोभूषी–भूतया भवदाज्ञया ।
राज्यं धर्ताऽस्मि कर्माणि, कुर्वाणः स्वाऽधिकारतः ॥११७॥

उपदेशाद्गता भ्रान्ति, रात्मधर्मं विवेद च ।
अक्रियो व्योमवच्चाऽऽत्मा, सत्तया स्वोपयोगवान् ११८

सम्यग्दृष्टिस्तु निर्बन्धो, नान्धः सम्यक्प्रदर्शकः ।
सत्यं सापेक्षया जानन्, सर्वं कार्य्यं करोति सः॥११९॥

ज्ञातो धर्मस्तवोद्बोधा, द्रुता एकान्तदृष्टयः
महावीरस्तु जगवा–, नुद्भूतोऽनन्तशक्तिकः ॥१२०॥

तपोजपज्ञानदयादमाना
मौदार्य्यसेवार्पणसंयमानाम्
सद्बोधनेनैव समग्रविश्वो–
द्धाराय वीरो भुवनेऽवतीर्णः ॥ १२१ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यो नन्दिवर्धन नमेच्च सहस्त्रवारं
स्तूयादपारमथ मां विधिभिः समर्चेत् ।
भूत्वा प्रमोदनपरोविदधच्च कर्म
स्वस्त्राऽधिकारकरणे प्रभवेच्च जव्यः ॥ १२२ ॥
हितकृन्निर्मितः सत्यं, ग्रन्थोऽयं शोकवारकः ।
मर्तृणां मृत्युतः पश्चाद्भणितः सुखकृद्भवेत् ॥ १२३ ॥
चिन्ता दूरमुपैति मोहसहितः शोकोऽपि याति क्षयं,
धर्मप्राप्तिकरा भवन्ति पठना न्नार्यो नरा भूतले ।
वाणीयं जयकारिणी जिनमहावीरप्रभोर्वर्त्तते,
श्री सूरीश्वरबुद्धिसागरकृतो ग्रन्थो भवेच्छ्रेयसे १२४

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# चेटकबोधग्रन्थः

वैशालीश निशम्यतां बुधवर
त्वं पुण्यवान्वर्त्तसे,
अन्ताराज्य मवेत्य राज्य मवनेः
कार्य्यं त्वया त्यागिवत् ।
वर्तस्वाऽथ दयाप्रदानदमनैः
ज्ञात्वा कुरुष्व क्रियाः,
राज्यं चाऽपि स्वयत्नतश्च विदध
द्भुङ्क्ष्वाऽन्नमुद्यम्य च ॥ १ ॥
लोकानांसुखहेतवे च विदध
द्राज्यं स्वसम्राड् भवेत्,
सत्याज्ञाः कुरु नो कदाचन पुनः
सत्ताऽभिमानं कुरु ॥
रोषं दोषिषु नो कुरु प्रियतया
त्वं दुःखिनः पोषय,
क्लेशं चाऽपि सहस्व धर्मकरणे
नो द्विष्य शत्रुष्वपि ॥ २ ॥
प्रेम्णा प्रवर्तस्व तु धर्मकार्य्ये,
जहीहि नो क्षात्रियभूपरीतिम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मृषाऽभिमानं कुरु नाऽपि किञ्चिन्,
न्यायो यत स्तत्र विरोधशान्तिः ॥ ३ ॥
सद्भक्तवृन्दान्कुरु चाऽऽत्मपार्श्वे,
प्राणाःपतेयु र्न वद त्वसत्यम् ॥
त्वं मारयाशु स्वकदुष्टवृत्तीः,
त्वं ह्यश्मवद्विद्धि धनं परेषाम् ॥ ४ ॥
परस्त्रियो विद्धि च मातृतुल्याः,
सम्मानय त्वं च महाऽऽत्मनोऽपि ।
नवं नवं ज्ञानमथो कुरु त्वम्,
प्रवर्त्तयाज्ञाश्च मम स्वदेशे ॥ ५ ॥
दयां च विस्तारय सर्वदेशे,
पशूँश्च संपालय हूयमानान् ।
संरक्षता द्रोगिजनाननाथान्,
गृहाण सन्मानवजन्मलाभम् ॥ ६ ॥
आकर्णयोद्घोष मपि प्रजानां,
क्लीबो भव त्वं नहि सत्कलासु ।
विद्धि स्वतुल्यानिह सर्वजीवान्,
सदैव कर्माचर यद्विधेयम् ॥ ७ ॥
राज्याद्बहि र्दुर्व्यसनानि कृत्वा,
नारी नरान्सौख्ययुतान्कुरुष्व ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विपन्नलोकस्य सहायकःस्या,
दुष्टैर्गुणै राज्यपराजयःस्यात् ॥ ८ ॥
सद्गुणानां महाराज्ये, सुखं ज्ञानं च निश्चितम् ।
दुर्गुणान्दूरतोमुञ्च, शूरः स्या नृपमण्डले ॥ ९ ॥
न निर्बलाऽऽत्मा कुरुते स्वराज्यं
सदा स्वराज्यं बलिनां विभाति ।
न्यायो यतस्तत्र हि सत्यराज्यं,
चाऽन्यायिराजा न कदापि गण्यः ॥ १० ॥
दण्डाद्यैर्हि कुरु न्याय, मीदृग्रीत्या प्रवर्त्तताम् ।
नृपरूपं प्रजैव स्या दितिज्ञाने न दुःखिता ॥ ११ ॥
संरक्ष जीवा न्निखिलान्स्वराज्ये,
सतो जनान्रक्ष विदण्ड्य दुष्टान् ।
प्रजाजनानां भव रक्षकस्त्वं,
मोहप्रमादाँश्च विसर्जय त्वम् ॥ १२ ॥
विषये परतन्त्रो य स्तस्य धैर्यं पलायते ।
दुर्बुद्ध्यानस्थिरः स्थाने श्रेयः स किं विधास्यति ॥१३॥
चित्तद्रवो यस्य भवेद्दयाभिः,
ननाम पादौ गुरु देवयोर्यः ।
प्राणात्ययेऽपि व्यभिचारको नो,
गण्यस्त्वसौ भूपपदस्य योग्यः ॥ १४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अहिंसया राज्य मुदेति नूनं,
तथा च हिंसाभिरुदेत्यधर्मः ।
समुद्धरेद्धिंसकपापिनो यः,
जीवेष्वलंस्या दुपकारकर्त्ता ॥ १५ ॥
मर्तुं परार्थं च समुद्यतो यः
स सत्यभूपो जगतो जयी स्यात् ।
भूत्वा पवित्र स्तनुवाङ्मनोभिः
साम्राज्य मुच्चैः कुरुते पुमान्यः ॥ १६ ॥
ईर्ष्यां च रक्षेत्खलु दुर्गुणेषु,
स्वर्गं शिवं राज्यमथाऽपि विन्ते ।
प्रीत्या च यः सान्त्वयति प्रकोपं,
प्रजाजनक्लेशमपाकरोति ॥ १७ ॥
राजा च यः सद्गुणनीतियुक्तः
सर्वाक्रियास्तस्य भवन्ति सिद्धाः ।
यो भूपति र्दुर्गुणनीतियुक्तः
कथं नृपोऽसौ नृपनामयोग्यः ॥ १८ ॥
महामार्यां च दुष्काले, प्रजावर्गं प्रपालयेत् ।
सर्वं पापं विनश्ये द्यो, स ध्रुवं धर्मभूपतिः ॥ १९ ॥
ज्ञात्वा सर्वविधां नीतिं, प्राणान्धर्मार्थं मर्पयेत् ।
आज्ञां प्रचारये द्राज्ये, दोषान् हत्वा गुणी भवेत् ॥२०॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निरासक्तया भवेद्राज्यं, प्रजाभूपोन्नतिस्तदा ।
ईदृग् विश्वानुपो राजा, न कदापि भवे पतेत् ॥२१॥
हेचेटक त्वंतु गुणाकरोऽसि,
त्वं सर्वथा पालयसे मदाज्ञाः ।
अन्तः कुरु ध्यान महो मदीयं,
ततश्च निर्वाणमवाप्स्यसि त्वम् ॥ २२ ॥
जानीहि अष्टादशभूपमुख्य,
विकाशयत्वं परमात्मसौख्यम् ।
आत्मोपयोगेन स सर्वदा त्वं,
नीत्या बहीराज्य मथो वह त्वम् ॥ २३ ॥
जगत्सु संचारय जैनधर्मं,
लभस्व बाह्यान्तरशक्तिवृन्दम् ॥
श्रीचेटकं तं प्रतिबोध्य वीरः,
प्रभुस्स पश्चात्प्रबभूव साधुः ॥ २४ ॥
श्रुत्वा वीरप्रभोर्वाणीं, धर्ममापुर्नृपप्रजाः ।
वीरबोधःकृतो व्यक्तो, बुद्धिसागरसूरिणा ॥ २५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# ( सुदर्शना सुबोधः )

प्रभो महावीर च वर्द्धमान
भ्रात र्विभो सत्यगुणावलम्बिन्;
हे देव विश्वेश्वर हे स्वयंभो
त्वामाश्रयन्तीश समग्रविश्वे ॥ १ ॥
महावतारः परमेश्वरस्य
संसारमुद्धारयितुं बभूव ।
नरोत्तमः श्रीपुरुषः पुराणः
पूर्णो महान्सर्वसुसज्जनेषु ॥ २ ॥
ज्ञानं च सत्यं तव सङ्गमेन
प्रादुर्बभूवैकलया च शक्तिः ।
लोकत्रयस्य प्रतिपाल धीर
श्रीमन्महावीर सदा जय त्वम् ॥ ३ ॥
विकाशितुं भूमिषु जैनधर्मं
तीर्थङ्करः प्रादुरभूद्गुणाब्धिः ।
गृहे वसन्दीपितवान् त्रिलोकी
मवातरद्भारतभानुरीशः ॥ ४ ॥
चन्द्रोऽथसूर्यो भवदाज्ञयैव
ग्रहाश्च सर्वेः परित श्चरन्ति ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

बहिर्न ते शासनतोऽस्ति कश्चि
त्सर्वस्य विश्वस्य सदाश्रयस्त्वम् ॥ ५ ॥
अध्यात्मदृष्ट्याऽसि महामहाँस्त्वं
चादर्शयन्तीह जना भवन्तम् ।
त्वन्नामतो दुःखमपैति सर्वं
सर्वापद स्त्वद्भजतां दहन्ति ॥ ६ ॥
श्रीमन्महावीरजपोद्यताना
मनादिकालीनमपैति पापम् ।
सुदर्शनाऽहं भगिनी त्वदीया
त्वद्बोधतोऽभून्मनसो विनोदः ॥ ७ ॥
स्वजन्मकालात्प्रभुवीरदेवः
समग्रविश्वेषु महाँश्चधीरः ।
अङ्गुष्टतो मेरुमकम्पयद्यो
मेरुस्तदाऽकम्पदतीवघोरम् ॥ ८ ॥
इन्द्रोऽविदद्यस्य अनन्तशक्तीः
त्वं स्वामिवीरो जयवान्प्रभूयाः,
इन्द्रादयस्त्वां प्रभुमाश्रयन्ति
त्वां विश्वदेवा अखिलाः स्मरन्ति ॥ ९ ॥
वीरेतिवीरेतिजपोद्यतानां
चिन्हं तदेवाऽस्ति सुभक्ततायाः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वर्गं महापापजनाश्च यान्ति
त्वत्सेवका नो नरकं विशन्ति ॥ १० ॥
प्रभो परब्रह्म हि साकृतिस्त्वं
देहं विधायोपकृतिं वितन्वन् ।
तत्त्याग्यवस्थाप्रथमं प्रभो मां
सुदर्शनां शिक्षय धर्मतत्त्वम् ॥ ११ ॥
प्रपीयमानं वचनाऽमृतं ते
सूते सुखं दुःखमपाकरोति ।
वीरप्रभो देह्युपदेशमेवं
नश्येद्यतःक्लेशगणो मदीयः ॥ १२ ॥
वीरप्रभुश्चेति वचो बभाषे
सुदर्शने त्वं शृणु हे गुणज्ञे ।
श्री जैनधर्मोऽस्ति जगत्सु सारः
शुद्धानि तस्याचरणानि सन्ति ॥ १३ ॥
त्वं सत्यबोधाऽऽचरणानि रक्ष
श्वसश्च मिथ्याचरणं जहीहि ।
श्रीजैनधर्मस्य जयो जगत्सु
ज्ञानेन दुष्टाचरणं विनश्येत् ॥ १४ ॥
न जैनधर्माद्बहिरास्ति धर्मः
कोऽपीति नीहि परं रहस्यम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ते मुख्यजैना मयि ये प्रकामं
प्रीतिं च विश्वासमथो धरन्ति ॥ १५ ॥
भ्राम्यन्ति ये वा न कुतर्कवादा,
द्दाम्यन्ति ये वा मन इन्द्रियाणि ।
क्रियागुणैर्वर्णविभाग एव
जानन्ति येते ममरागभाजः ॥ १६ ॥
योग्या तु जातिर्गुणकर्मभिःस्या
न्न जन्मतो जातिरियं हि योग्या ।
गुणक्रियाभिः सकला हि वर्णाः
सत्यं मदीयं शरणं लभन्ते ॥ १७ ॥
स्वकर्मणः स्वस्वगुणाऽनुसारं
भजन्ति मां ते सकला हि वर्णाः ।
श्रीजैनधर्मं समुपास्य दध्युः
शिवं यथाशक्ति सुखं लभन्ते ॥ १८ ॥
जानीहि सर्वान्मनुजान्समानान्
जातिं तथा तद्गुणकर्मयोगैः ।
उच्चोऽथ नीचो व्यपदिश्यते य
स्तन्निश्चये कोऽपि न तत्र सारः ॥ १९ ॥
न वर्णधर्मेषु च गर्वितःस्या
न देहरूपेषु च मुह्य किञ्चित् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जानीहि सर्वान्हृदये समानान्
कंचिज्जनं नाप्यपमानय त्वम्           ॥ २० ॥
जैनाश्च ये सन्ति गुणक्रियाज्ञि
वर्तन्त एवं व्यवहारतस्ते ।
अन्त र्न लिङ्गं न च काऽपि जातिः
श्री जैनधर्मस्य रहस्यमेतत्           ॥ २१ ॥
श्रीजैनधर्मप्रतिपालयन्ती
म्रियस्व तस्मात्तर वा भवाब्धिं ।
ये नास्तिका दुष्ट नराश्च नार्य्य
स्ते मां न जानन्ति जगत्सु सारम्           ॥ २२ ॥
ये मां न जानान्ति नराश्च नार्य्य
स्ते नास्तिकाः सन्ति हि विद्धि सत्यम् ।
ये जैनधर्मं न च मानयन्ति
दुर्बुद्धयो दारुणनास्तिकास्ते           ॥ २३ ॥
विश्वासनीया न च ते कदाचि
द्ये नास्तिका दुर्मतयो हि वक्राः ।
तेषां न सङ्गोऽपि कदापि कार्य्यो
ये सन्ति मद्भक्तिविनाशदक्षाः           ॥ २४ ॥
गुणाश्च दुःसङ्गतया व्रजन्ति
प्रादुर्भवेद् दुष्टगुणो द्वितीयः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat           www.umaragyanbhandar.com

मय्यस्ति येषां बहुलोऽनुराग
स्तच्चेतसि त्याग उदेति पूर्णः ॥ २५ ॥
अनन्यभक्त्याऽत्र भजन्ति मां ये
तैः सज्यते चेतसि शुद्धमुक्तिः ।
धरन्ति नो ये हृदयेऽपराशां
ये वा मनुष्या मयि विश्वसन्ति ॥ २६ ॥
जीवन्त एते प्रभवन्ति जैना
भवन्ति चित्तैरपि नाऽन्य दासाः ।
जैना मदर्थं प्रसभं म्रियेरन्
वैमानिके तेऽवतरन्ति मृत्वा ॥ २७ ॥
येषां भयं धर्मरणं विधातुं
न चाऽस्ति तेषां हृदि जैननीतिः ।
देहस्य चाऽध्यास इहाऽस्ति याव
ज्जीवाश्च तावज्जगतो हि दासाः ॥ २८ ॥
जानन्ति कायान्वसनेन तुल्या
न्ते सत्यनीत्या प्रभवन्ति जैनाः ।
ये मद्वचस्सु प्रति विश्वसन्ति
प्रसिद्धजैनाः खलु ते भवन्ति ॥ २९ ॥
ये चाऽऽत्मविज्ञा खलु ते च जैना
धरन्ति चित्ते न कदापि दैन्यम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सर्वाणि कर्माणि सदाचरन्तो
मन्नाम ये केऽपि मुदा भजन्ति ॥ ३० ॥
विश्वास मारोप्य मयि प्रकामं
कुर्य्युः क्रियां ते न भवन्ति दासाः ।
मद्भक्तये ये च भवन्ति योग्या
स्तान्संविधातुं स्वशिरोऽपि देयम् ॥ ३१ ॥
दुःखानि मह्यं खलु ये सहेरन्
भुञ्ज्युश्च ये कर्म तथाप्य कर्म ।
धरन्ति नो ये जडवस्तुदैन्यं
जैनाश्च ते दुष्टगुणान्जयन्ति ॥ ३२ ॥
जैनास्तु ये शत्रुचयं जयन्ति
सम्यक्त्वतो ये खलु निर्वहन्ति ।
श्रीजैनधर्मव्यवहारकार्य्यै
रक्षेत्सदाचारविचारराशिम् ॥ ३३ ॥
यथा समर्थं समयानुसारं
जैनांश्च ते ये प्रतिपालयन्ति ।
ते सर्वकालेषु भवन्ति जैना
नार्य्यो नरा ये खलु मां भजन्ति ॥ ३४ ॥
वेषक्रियाणां तु मृषैव भेदो
न तत्र खेदं कुरुते जनो यः ।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वेषक्रियाः सन्ति बहुप्रकारा
यस्मिन्रुचिर्यस्य स तस्य सारः ॥ ३५ ॥
अन्यक्रियाकर्तृजनेन सार्द्धं
सदाऽत्मभावेन हि वर्त्तते यः ।
निन्दां न कुर्यान्मतमार्गभेदै-
र्मां नीतितो यः स्मरति प्रकामम् ॥ ३६ ॥
यतो मयि प्रेम ततो हि युक्ति
स्तथाविधा मुक्ति मवाप्नुवन्ति ।
श्रीजैनधर्मस्य शृणोतु सारं
मनो मयि न्यस्य तु निश्चयेन ॥ ३७ ॥
वर्तन्त एतद्भुवि वीतबन्धं
य मानवास्ते खलु सन्ति जैनाः ।
दिवानिशं मानवजातयो या
स्सर्वत्र खण्डेषु च मां भजन्ति ॥ ३८ ॥
स्वतन्त्रतां शान्तिमथो लभन्ते
ते जीवनं शुद्धधिया वहन्ति ।
सुदर्शने ! मेऽस्ति नचादिरन्तो
दृष्ट्या यतो पश्यसि चाऽस्मि तत्र ॥ ३९ ॥
पूर्णानुरागी मम जायते यो
लभेत पूर्णं सच जैनधर्मम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ज्ञानं तथा प्रेम हि जैनधर्म
स्सर्वेषु जीवेषु दया च सत्या ॥ ४० ॥
त्क्तौ ममैवाऽस्ति तपोजपादि
र्नो बुद्धिगर्वो न वसेत्कुधर्मे ॥
महाऽऽत्मनो मत्सदृशान्विदन्ति
क्लेशो न तेषां हृदये कदाचित् ॥ ४१ ॥
कुर्वन्ति ये सज्जनशुद्धसेवा
मभेदबुद्ध्या मयि ये वसन्ति ।
श्रीजैनधर्मस्य तु सत्यसारं
जानीहि तत्सज्जनशुद्धसेवा ॥ ४२ ॥
दुःखे सुखे ये मयि विश्वसन्ति
व्यग्राः कदाचिन्न च ते त्ववन्ति ।
क्षान्त्वोपसर्ग प्रभजन्ति मां ये
दुःखस्य दाहं च सदा विसह्य ॥ ४३ ॥
मामन्तराऽन्यं नच कंचिदिच्छे
त्स मत्समो भक्तजनश्च पुण्यः ।
सहेत मह्यं सकलापमानं
सहेत निन्दा मथवा च गालीम् ॥ ४४ ॥
सहेत सर्वं च परीषहादि
मामन्तरा कामयते न किञ्चित् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विषं सुधीमत्य गलेद्यथेच्छं
वियोगतो मे प्रदहेद्यदन्तः ॥ ४५ ॥
जैनाश्च ते सन्ति महापवित्रा
मय्येव चित्तं विनिवेशयन्ति ।
मीलन्ति ते मत्सदृशाश्च भूत्वा
ये मत्पथं स्वार्पणतो व्रजन्ति ॥ ४६ ॥
नमामृतेऽस्त्यत्र यदीयराग
स्त्यागोऽन्तरे भोगिदशासु येषाम् ।
कुर्वन्त्यमोहं जडसञ्चयं ये
ये व्यापृणन्त्यत्र निजोपयोगैः ॥ ४७ ॥
बहिर्ग्रह श्चेतसि तद्विसर्गो
विरागता वस्तुषु पौद्गलेषु ।
शुभाशुभीयां न जडेषु बुद्धिं
शुद्ध्या तथा कर्म सदाचरन्तः ॥ ४८ ॥
मच्चिंतका मन्मनसो नरा ये
सर्वत्र कालेषु ममाऽनुरक्ताः
निष्कामकर्माण्यखिलानि कुर्य्यु
जैनाश्च ते मत्पदवीं लभन्ते ॥ ४९ ॥
लक्ष्मीवृद्धौ नवा हृष्या त्तन्नाशे नाऽपि खिन्दाति ।
लक्ष्मीभावो न लक्ष्मीषु हर्षं शोकं नवाचरेत् ॥५०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सेवमाना जगज्जैना एवं देवा भवन्ति हि।
भोग्यपि भोगतो भिन्नो, वीतरागस्स जायते ॥५१॥
वर्त्तन्ते समभावेन मत्समास्ते नरास्त्रियः।
साम्यं च जैनधर्मोऽस्ति तदाप्नुहि सुदर्शने ॥ ५२ ॥
जीवनं वह सद्वृत्त्या जैनधर्मः स्थिरः समः।
पवित्रं जीवनं येषां, मद्भेदं ते न विन्दते ॥ ५३ ॥
सर्ववर्णा नरानार्य्य स्त्यागावस्थाऽधिकारिणः।
सर्वकामविनाशेन त्यागावस्थागुणाः खलु ॥ ५४ ॥
स्वातन्त्र्यं चान्तरत्यागै र्दासत्वं जडमोहतः।
नृपेभ्यस्त्यागिनः श्रेष्ठास्तदधः सर्वजीवनम् ॥ ५५ ॥
त्यागोऽस्ति यद्यदंशेन, वैराग्यं तत्तदंशतः।
वैराग्येनाऽऽत्मरागोऽस्ति जागृह्यन्तः सुदर्शने ॥ ५६ ॥
कामाशाबन्धना दुःखं कामाशाविरहात्सुखं।
कामाशात्यजनं त्यागो, वेत्ति भाग्यनिधिः पुमान् ५७
निर्ग्रन्थास्त्यागिनः सौख्य,—भाजः संन्यासिनस्तथा।
देशादिप्रतिबन्धो न तेषां न ममतालवः ॥ ५८ ॥
यद्रागो न जडे कश्चि त्तत्यागः शुद्ध आन्तरः।
यो जागर्त्याऽऽत्मभावेन योगी सोऽस्ति सुदर्शने॥५९॥
द्वेषो जडे नाऽस्ति शुभाशुभो वा
क्लेशो न तेषां हृदि कश्चिदस्ति।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्रवर्तमानस्स जडेषु कांचि
ल्लभेत पीडां नहि चेतसि स्वे ॥ ६० ॥
स्पृशे स्स्पर्शेन्द्रियेणैव प्रारब्धं साम्यतो वहेत् ।
धर्म्ये स्पर्शे धरन्साम्ये स्थितः प्रारब्धवाहकः ॥६१॥
रसेद्रसा न्यो रसनेन्द्रियेण
प्रारब्धतः साम्यधिया च तिष्ठेत् ॥
प्रयोजने वेत्तिरसान्समग्रा
न्त्यागत्वमन्तःकरणे विधाय ॥ ६२ ॥
यो वा रसासक्ति मृते यथेच्छं
स्वादेत्परं मोहधिया व्रमेन्न ।
भोगं तथाऽऽसक्ति मृते प्रकुर्व
न्प्रारब्धतस्तर्हि स योग एव ॥ ६३ ॥
आगच्छतो नासिकया सुगन्धो,
दुर्गन्धकश्चाऽत्र जवेन्न चाऽन्धः ।
साम्येन गन्धग्रहणं प्रकुर्या
त्प्रारब्धतो जीवन मावहेच्च ॥ ६४ ॥
हृष्यात्सुगन्धेन मनो न किञ्चि
द्दुर्गन्धतो नाऽपि शुचं लभेत ।
न नासिकापौद्गलगन्धतो वै,
सञ्जायते ज्ञानवतां च बन्धः ॥ ६५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रूपाणि दृग्भ्यां प्रविलोकयन्ति,
न ज्ञानिनस्तत्र भवन्ति लीनाः ।
दृश्यानि दृग्भ्यां प्रविलोकयन्ति,
परं न तेषां वशगा भवन्ति ॥ ६६ ॥
दृग्भ्यां विना वासनया प्रपश्यन् ,
समश्नतऽसौ परमार्थबोधम् ।
दृशोश्च रूपाणि हि साधनानि,
धर्मस्तु दृग्भ्यां भवति प्रमाणम् ॥ ६७ ॥
निरीक्ष्य जीवप्रतिपालनार्थं,
दृशावमौ वीक्ष्य विचारणार्थं
दृशौ सुखार्थं भवतस्तथेमौ,
गुरोश्च देवस्य विलोकनार्थम् ॥ ६८ ॥
दृग्भ्यांच धर्मोऽपि विकाशते वै,
रूपेण बन्धं न बुधा लभन्ते ।
साम्येन दृश्यानि विलोकय त्वं,
मोहादिवश्या भव नो कदाचित् ॥ ६९ ॥
अनन्तपुण्यैर्मिलितं हि चक्षुः,
सज्ज्ञानिनां सर्व महो सुखार्थं ।
कदाचि दाऽऽकर्णय नापशब्दा
जानासि चेदाऽऽत्मदशाहितानि ॥ ७० ॥

अधर्म्यशब्दै र्जगदस्ति पूर्णं
धर्म्यैश्चशब्दैः सुखसारमस्ति ।
शब्दान्त्यजाऽधर्मविवर्द्धकाँस्त्वं,
शब्दान्शुभा न्नावय चेतसि त्वम् ॥ ७१ ॥
श्रुत्वाऽशुभं द्विष्य सुदर्शने नो
विसह्य निन्दां कुरु कोपनाशम्
शुभश्रुतौ चाद्यदशासु राग
स्त्यागश्च पश्चाद्भवतीति विद्धि ॥ ७२ ॥
मानापमाने च निशम्य हर्षं,
शोकं नवा चेतसि चानय त्वम् ।
न शब्दसृष्टेः खलु पारमस्ति,
तत्तत्र नाऽसक्ति रये विधेया ॥ ७३ ॥
गुरोश्च देवस्य गुणान् श्रृणु त्वं,
कर्णौ शुभाकर्णनहेतवेस्तः ।
मुक्ति र्भवेदिन्द्रियतोऽपि यश्चे,
च्छुभार्थ मेवोपयुनक्ति तानि ॥ ७४ ॥
वाण्याऽपि भाषस्व शुभं च सत्यं
सुदर्शने ! रक्षयतात्स्वधर्मम् ।
कुरुष्व वश्यानि निजेन्द्रियाणि
सुदर्शने स्वादय चाऽऽत्मसौख्यम् ॥ ७५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सुखं जयेनैव निजेन्द्रियाणां–
दुःखं वशेनैव निजेन्द्रियाणाम् ।
शुभोपयोगो हि निजेन्द्रियाणां–
सद्धर्मयोगोऽस्ति ममोपदिष्टः ॥ ७६ ॥

योगं न तेषामशुभे कुरुष्व,
प्रारब्धतो धर्मकृते च भोगः ।
सम्यक्तया मां भजतां जनानां,
भवन्ति तत्तद्विषयेन्द्रियाणि ॥ ७७ ॥

ज्ञानाय लब्धानि निजेन्द्रियाणि,
भोगाय जानीहि तथा च तानि ।
शुभोपयोगोऽस्ति यदीन्द्रियाणां–
श्रीजैनधर्मो गुणयोग एषः ॥ ७८ ॥

युञ्जन्ति चित्तं सममाऽऽत्मना ये,
तेषां तु दोषा विलयं प्रयान्ति ।
अनन्तपुण्येन मनो हि लब्धं,
भाग्यान्महत् साधनमस्ति हस्ते ॥ ७९ ॥

मनोऽन्तरा नास्ति निजाऽऽत्ममुक्ति–
स्तस्मान् मनोशुद्धिमहो कुरुष्व ।
आत्माऽस्ति राजा च मनःप्रधानः,
कायोरथो वाजिन इन्द्रियाणि ॥ ८० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्मोपयोगे निखिलक्रियाणा-
माचारतो धर्म उदेति पूर्णः ।
आत्माऽनुसारं मनसः प्रवृत्त्या,
भवेद्विशुद्धोऽतितरां तदाऽऽत्मा ॥ ८१ ॥
पूर्णो भवेच्चेन्मनसो विकाश-
स्तदा भवेदाऽऽत्ममहाविकाशः ।
मनोविकाशाय हि निश्चितं त्वं,
प्राप्तिं च जानीहि निजेन्द्रियाणाम् ॥ ८२ ॥
दयां च दानं च दमं कुरुष्व,
तथाऽऽत्मशक्तीः सहसा लभस्व ।
लब्ध्वाऽऽत्मशक्तीः कुरु धर्मकार्य-
निजाऽऽत्ममुक्तिं च कुरु प्रकामम् ॥ ८३ ॥
चित्तेन्द्रियशरीरैर्हि, आत्मा पूर्णः प्रकाशते ।
वाङ्मनःकायसंयोग-आत्मयोगस्तु तद्बलात् ॥ ८४ ॥
ब्रह्मचर्यैर्वपुर्वीर्यं, लब्ध्वा धैर्यं प्रकाशय ।
आत्मशक्तिरनन्ताऽस्ति, कायशक्त्या प्रकाशते ॥८५॥
नीरोगं रक्ष कायं तद्, योगियोग्यो भविष्यसि ।
रक्ष चौषधिवायुभ्यां, योग्यसात्त्विकभोजनैः ॥ ८६ ॥
अमूल्यं च वपुर्ज्ञात्वा, धर्माऽर्थं देहयोग्यता ।
वाचः सारं स जानाति, आत्मशक्तिं समश्नुते ॥८७॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विचार्य्य मधुरं ब्रूहि, सत्यं तुलय चेतसि ॥
नाऽस्ति सत्यसमो धर्मो-नास्त्यधर्मो मृषासमः॥८८॥
ज्ञात्वा सत्यं प्रियं ब्रूहि, प्रतिज्ञातं प्रपूरय ।
अतो ज्ञातिकुलं ख्यातं, वेत्ति सत्योक्तिषु प्रियम् ८९

सत्यं वदेत्स्यात्स महान्हि सत्यं,
निशामयंतौ सफलौ च कर्णौ ।
स्वाचार आरोपय सत्यमेत-
त्तस्माच्छुभं यास्यति सर्वकृत्यम् ॥ ९० ॥

अल्पदोषो महान्धर्मः सर्वधर्मो यतो भवेत् ।
तं विद्धि देशकालाभ्यां, सत्यं संघादिकाक्रिया ॥९१॥

सत्यं वसेत्तत्र ममाऽस्ति धर्मः,
सत्यं क्षयेत्तत्र भवेदधर्मः ।
सत्यात्सुखं दुःखमुदेति पापा-
न्नाऽन्या यतश्चेतसि शुद्धशान्तिः ॥ ९२ ॥

शक्तिःक्षयेदेव वदन्नसत्यं,
विश्वासनीयोऽपि न तस्य कश्चित् ।
व्यक्ताऽपि वाक्सिद्धिरपैति दूरं,
भवन्ति दुःखानि विपत्तयश्च ॥ ९३ ॥

जयेदसत्यं स नरोऽस्ति जैनः
सत्यं वदन्दैन्यमथो न कुर्य्यात् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

लक्ष्मीर्यशो वा यदिवापगच्छे-
त्तदाऽपि सत्यं स नरो वदेद्धि ॥ ९४ ॥
पापानि सत्योक्तिषु नो भवन्ति,
न्यायोऽपि कश्चिन्न हि सत्यतुल्यः ।
ज्ञानं विना सत्यमपि प्रमाणं-
नैवाऽस्तितज्ज्ञानिजनस्तु विन्ते ॥ ९५ ॥
अन्यायचौर्य्ययोस्त्यागे-मयि रागो भविष्यति ।
मनोवाणिशरीरार्थं, सत्यं सङ्केतितं मया ॥ ९६ ॥
अस्ति कायान्महच्चित्त-माऽऽत्माऽस्ति मनसो महान् ।
तत्कर्म सात्विकं वेत्ति, सत्यं यश्चोत्तरोत्तरम् ॥ ९७ ॥
कुर्यादिन्द्रियसंरक्षां, यो मनो मयि विन्यसेत् ।
आत्मवद्गणयेदन्यान्, मद्भक्तिं स समश्नुते ॥ ९८ ॥
धर्माऽर्थं वाङ्मनःशुद्धिं, रागरोषौ न चाऽऽचरेत् ।
प्राप्तं यत्तत्र संन्तोषो-न दोषं कस्यचिद्वदेत् ॥ ९९ ॥
अशुद्धं मर्म मा ब्रूहि, विचार्य मधुरं वद ।
वर्द्धते निन्दया पापं, नो मद्भक्तिः शुभा भवेत् ॥१००॥
गुरोश्च देवस्य जहीहि निन्दां-
सुदर्शने जागृहि सद्गुणे स्तवम् ।
सदा रिपुभ्यो भव सावधाना
द्रव्येण भावेन च निर्मला स्याः ॥ ॥ १०१ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्रुधा समारोपय मा कलङ्कं-
क्रोधेन मा ब्रूहि तथापशब्दम् ।
संरक्ष विप्रा स्स्वजनान्गुणज्ञे
संरक्ष तद्वत्पशुपक्षिणस्त्वम् ॥ १० ॥
अस्ति गोपालने धर्म-आर्याणां कर्म तच्छुभम् ।
धेनू रक्ष गृहेकृत्वा, प्रीत्या त्वं हि सुदर्शने ॥ १०३ ॥
पालनेन भवेत्स्वर्गो-गवादिपशुपक्षिणाम् ।
यत्र वासो मृगादीनां, यज्ञयोग्याऽस्ति सा धरा १०४
भवेद्धिंसा गवादीनां, तत्र यज्ञो न जायते ।
स यज्ञदेश आर्याणां, मज्ज्ञानं यत्र जायते ॥ १०५ ॥
पालयन्ति गवादीन्ये, स्वस्तेषामायुषः क्षये ।
यत्र गावो निहन्यन्ते, तत्र काचिन्न यज्ञता ॥१०६॥
यज्ञेषु पशुनाशेन, दुःखे वासस्तु निश्चितः ।
यत्र हिंसा ततो यज्ञो, नास्ति शिक्षां प्रमाणय १०७
ये ब्राह्मणक्षत्रियवैश्यशूद्रा-
रक्षन्ति गास्ते सुखिनो भवन्ति ।
एषाऽऽर्यरीतिः कथिता त्वदर्थं,
तद्वर्तने काऽपि न पापभीतिः ॥ १०८ ॥
समाजदेशयो र्गावो, धनानि महिषादयः ।
रक्ष्यन्ते तत्र नोत्पाता-मानवा दधते सुखम् ॥१०९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जैनधर्मस्ततो जीव-न्यतो गावो गृहे गृहे ।
उत्पातास्तत्र नश्यन्ति, मदाज्ञा यत्र पाल्यते ११०
प्रतिगृहं सतां मानं, दानं यत्राप्यते मुदा ।
अतिथिसेवने प्राणा-अर्पिता ते तु मत्समाः ॥१११॥
बुभुक्षूणां मिलेदन्नं, प्रसन्ना यत्र दुःखिनः ।
तृषार्त्तानां तथा वारि, तत्र मद्भक्तिरुद्भवेत् ॥ ११२ ॥
गुरूणां पूजनं यत्र, वृद्धा यत्र न दुःखिनः ।
भक्ता गायन्ति मद्गानं, मज्ज्ञानं तत्र जायते ॥११३॥
साधूनां बहुसत्कारः, परस्पर मुपग्रहः ।
रक्ष्यन्ते बालका नार्यो-जनाःशाम्यन्ति पुण्यतः ११४
नाऽन्यायतो यतोदुःखं, जना नाऽन्यायकोपिनः ।
वैरेर्ष्योपशमो देश-समाजा विन्दते सुखम् ॥११५॥
गृहेगृहे च मे भक्ति-र्यत्र न स्युः क्षुधाऽऽदयः ।
तत्र शान्तिः सुखं तुष्टि-स्तत्र न स्यादुपद्रवः॥११६॥
क्षाम्यन्तो हि मि थो वैरं, क्षान्ता यत्राऽपराधिनः ।
व्यवहारो यतो नीत्या, तत्र मद्भक्ति रुत्तमा ॥११७॥
न्यायेन शोभते राज्यं, शान्तिः सम्राजते ततः ।
दण्डयन्ते पापिनो दुष्टाः, पुण्यं तत्रातिवर्द्धते ॥११८॥
ममाज्ञा पाल्यते यत्र, नोत्पाता नेतयस्ततः ।
मदाज्ञा नोधरेच्चित्ते, न नीतिस्तस्य शोभना ॥११९॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तत्र नो जायते शर्म, यत्तस्यु र्व्यभिचारिणः ।
समाजदेशयोः पातो-बुद्धिकाशः पलायते ॥ १२० ॥

व्यभिचारादिपापानां, देशादौ स्युर्विपत्तयः ।
यत्र पापैर्भृतो देश-स्तत्र दुःखोद्भवस्सदा ॥ १२१ ॥

प्रतिगृहं यतो हिंसा, मानवश्चाऽस्ति मानवान् ।
उग्रपापानि जायन्ते, तत्र देशप्रजा लयः ॥ १२२ ॥

देशस्य पापेन हि देशनाशः,
स्यात्खण्डनाशेन, हि खण्डनाशः ।
देशस्य पुण्येन विभाति देशः,
खण्डस्य पुण्येन विभाति खण्डः ॥ १२३ ॥

पुण्यप्रवृत्तिश्च पवित्रबोधो-
यत्रोद्भवेत्तत्र हि पुण्यनीतिः ।
देशप्रजासंघजनस्य शान्तिः,
सुखं च सम्पद्भवति प्रकामम् ॥ १२४ ॥

दुष्टबुद्ध्या भवेत्क्रूरो-दुःखमत्र परत्र च ।
क्षेमे कृते भवेत्क्षेमं, जयः पुण्येन जायते ॥ १२५ ॥

तीव्रं यत्क्रियते पापं, तत्तु सम्प्रति वेद्यते ।
फलेदत्र कृतौ धर्मः फलेन्मानसकामना ॥१२६॥

भवेन्न्यायेन सद्वृद्धि-र्देशे च राज्यसंघयोः ।
कैस्समं कुरु नो छद्म, सत्कर्माणि त्वमाचर ॥१२७॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उक्त्वा कुरु न तद्भङ्गं, कुरु मा दुष्टसङ्गमम् ।
विश्वसीहि न दुष्टेषु, मा दासो व्यसनी भव॥१२८॥
व्यसनाद् दुर्गुणाद् दूरं, वसतां मुक्तिरुद्भवेत्,
अन्यायेन न धर्मः स्या–न्न श्रेयः पक्षपाततः॥१२९॥
आत्मवद्यत्र नीतिः स्या–त्तत्र मच्छक्तिरुल्लसेत् ।
यत्र विश्वासिघातो न, तत्र पुण्यप्रभोदयः ॥१३०॥
यत्र किञ्चिन्न भेदोऽस्ति, सत्यैक्यं यत्र पाल्यते ।
देशराज्योभयोर्वृद्धिः, स्यादानन्दो गृहे गृहे ॥१३१॥
सम्मतिर्यत्र राज्येषु, तत्र शान्तिश्च वर्तते ।
प्रामाणिका यतो जैना–वृद्धिः स्यात्तत्र सर्वतः १३२
न कुर्य्यादपरस्येर्ष्यां, वृत्तिर्यत्राऽस्ति सात्त्विकी ।
ज्ञायन्ते सरला दार्य्या, आर्य्य भूमिस्तु धर्मतः ॥१३३॥
विश्वासो मयि यस्याऽस्ति, स आनन्दं समश्नुते ।
संशयाऽऽत्मा भवेन्नष्टः, प्रकाशन्ते न शक्तयः ॥१३४॥
नास्तिकैः सह वासेन, श्रद्धा नश्यति तत्क्षणात् ।
अश्रद्धाया गुणाभावो, विनश्यन्ति प्रकाशिताः १३५
नाऽश्रद्धया फलेन्मंत्रं, कार्यसिद्धि र्न तां विना ।
मयि श्रद्धालवो भव्या, लभन्ते सकलान्गुणान् १३६
तर्कादयः प्रमाणानि, सन्त्यश्रद्धालुबोधने ।
श्रद्धाप्रमाणमुत्कृष्टं, बहुशक्तिगुणाकरः ॥ १३७ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्रद्धाप्रेमस्तु मद्भक्ति-र्न भक्तिः संशयास्पदे ।
शुद्धप्रेम्णाऽस्ति मद्दृष्टि-र्दैवी सृष्टिस्ततो भवेत् १३८
श्रद्धाप्रेमबलाद्भक्ति-स्तामृते निष्फलं तपः ।
श्रद्धालवो नरा नार्य्य-स्तेषामत्र फलं भवेत्॥१३९॥
श्रद्धालवो नरा नार्य्य-स्तत्र मद्भक्तिशक्तयः ।
श्रद्धाप्रेमैव मद्रूपं, तद्विना दुःखमुद्भवेत् ॥ १४० ॥
मन्नाम्ना भजते मां यः, सर्वशक्तीः समश्नुते ।
मन्नाम्ना यत्र रागः स्या-त्सोऽभङ्गः सर्वकर्मसु ॥१४१॥
मयि श्रद्धातिरागी यो-महाभाग्यमवेहि तम् ।
मत्प्रेमिणश्च ये जैना-स्ते जयं चाऽत्र विन्दते॥१४२॥
बुद्धिवादं परित्यज्य, सत्कार्य्यप्रेममानसा ।
भूत्वा मदाज्ञया गच्छ, पश्याऽऽत्मानं सुदर्शने॥१४३॥
बाह्यान्तर्वर्तनं चैकं, मद्भक्तानां सुनिश्चयः ।
सत्यं विवेकमाधाय, वर्त्तते चतुरो जनः ॥ १४४ ॥
आसक्तिं विषये नैव, सत्कर्म नित्यमाचरन् ।
अतिभोगेन रोगः स्या-दात्मनिर्बलता भवेत् १४५
धर्म्यभोगेन योगस्य, साधना मम रागिणाम् ।
आप्नुवन्ति न ते शोकं, विशालदृष्टिधारकाः १४६
गाम्भीर्यमभितः पूर्ण, मिच्छा दुर्व्यसनस्य नो ।
नेच्छन्ति मां विना किंश्वि-ल्लभन्ते भक्तिमीदृशाः १४७



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नाम्नि रूपे त्यजेन्मोहं, न द्रुह्यादुपकारिणे ।
स्वस्वातन्त्र्यं सदा रक्षे–त्पारतन्त्र्यं सहेत न ॥१४८॥
जगन्मान ममानं च, तत्र ध्यानं न धारयेत् ।
बन्धेकोऽपि न धर्मोऽस्ति, अधर्मः प्रतिबन्धने॥१४९॥
विषयेषु न बद्धा ये, जीवन्मुक्ता भवन्ति ते ।
असन्मानंच नाकांक्षे–द्वित्तानुसारदानवान् ॥१५०॥

इच्छा स्वकीयाऽस्ति भवस्य मूलं,
तृष्णा तथाऽशा भवदुःखमूलम्
करोति यो वाऽऽत्मवशां निजाशां,
भूत्वा स भक्तो मम शान्तिमेति ॥ १५१ ॥

मुह्यन्ति लोकेषु न चाशया ये,
स्तवेषु निन्दासु समा भवन्ति ।
ते योगिनः कर्मकृतो मदीयां,
लीलां लभन्ते भवमुत्तरन्ति ॥ १५२ ॥

भक्तेषु मे मत्सम एव राग–
स्तथैव भक्ता मम भाग्यवन्तः ।
दोषेण युक्तोऽपि भवेददोषी,
रोषेषु यो वै कुरुतेऽतिरोषम् ॥ १५३ ॥

सुदर्शने कुप्यति यश्च कोपे,
मानेषु मानी प्रतिजायते यः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कापटयकर्त्ता कपटेषु यः स्याद्,
भूत्वा प्रलोभी प्रणिहन्ति लोभम् ॥ १५४ ॥
कुर्य्याच्च मोहादिषु शत्रुभावं,
स्वतंत्रताया मिति सद्विलासः ।
कुर्वन्त एवंविधकर्मजन्ती,
जैनाः सदा शुद्धसुखं लभन्ते ॥ १५५ ॥
अनन्तशक्तिस्त्वयमात्मदेव-
श्चित्तेन कुर्वंश्च निजाऽऽत्मसेवाम् ।
आत्माऽर्थ मन्यान्यखिलानि कुर्या-
च्छ्रीजैनधर्मो लभते स्वराज्यम् ॥ १५६ ॥
कुर्य्याज्ज्ञात्वा शुभं कर्म, मृषाबन्धं परित्यजेत् ।
वर्तमानं शुभं कर्म, कुर्याल्लज्जां नवाऽऽचरेत् ॥१५७॥
मागा भयं दुर्जननिन्दया त्वं,
शुभानि कर्माणि विधेहि भावैः ॥
स्वीयं तु जानीहि मनस्सु सत्यं,
त्वं धेहि रीतींस्तु महाजनानाम् ॥ १५८ ॥
विशालदृष्टया कुरु सर्वकार्यं,
मृषावचो विद्धि न चैव सत्यम् ।
विशन्ति सत्यानि तु जैनधर्मे,
न जायतेऽसत्यतयाऽत्र शान्तिः ॥ १५९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निर्दोषिणः पीडय नो कदाचि-
   च्छ्रीजैनधर्मं त्वमवेहि सत्यम् ।
अशक्तिकान्पीडय मा कदाचिद्,
   भूत्वोद्धता नो पतिता भवन्तु ॥ १६० ॥

निरागसो दण्डय नो कदाचि,
   च्छिरस्सु कृत्वा च शुभां मदाज्ञाम् ।
काँश्चिन्न किंचिन्ननु वञ्चय त्वं
   विधाय नर्णं कुरु किंच कार्यम् ॥ १६१ ॥

अत्यंतपापं च यतोऽस्ति देशे
   सर्वा विपत्तिः समुदेति तत्र ।
अन्यायिनां स्याः प्रतिपक्षकर्त्ता,
   न्यायेन सत्येन बलेन पूर्णः ॥ १६२ ॥

स्वप्राणरक्षाय सुदर्शने त्वं,
   न निर्बलीभूय जहीहि लज्जाम् ।
मृतिर्नवेत्किंतु जयं भवेन्न-
   एवं हि जैना जगति स्थिराःस्युः ॥ १६३ ॥

कस्याप्याऽऽगो न कर्तव्यं, मा स्पर्धस्वोत्तमैः सह ।
कुरु नो दुष्टविश्वासं, दुष्टदासो न वा भव ॥ १६४ ॥
सत्यशिक्षां श्रुतौ न्यस्य, त्यक्त्वा द्वेषापमानने ।
सहस्व देवगुर्वर्थं, संघार्थं जीवनं वह ॥ १६५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विनयं कुरु वृद्धाना—मन्तर्दोषं निवारय ।
प्रमाणं कुरु साधूनां, मन्नाम स्मर जावतः ॥ १६६ ॥
ज्ञानादिभिर्महान्योऽस्ति, तस्य त्वं विनयं कुरु ।
जैनधर्मस्य मूलं हि, विनयं विद्धि निश्चितम् ॥१६७॥
गृहाण विनयैर्विद्यां, शक्तीश्च विनयैः पुनः ।
विनयेन शुभप्राप्ति—र्गर्वोऽज्ञाने च गच्छतः ॥१६८॥
सद्रागो मातृपित्रादौ, विनेयानांहि मुक्तये ।
गुरोर्विनयतो ज्ञानं, वृद्धिवेला प्रजायते ॥ १६९ ॥
क्लेशका यत्र तत्रैव, पशवो विनयादृते ।
नश्येद्धि विनयात्पापं, मत्प्रेमा विनयं धरेत् ॥१७०॥
संशोभते नो विनयं विना जनः,
स्वच्छं न चित्तं विनयं विना भवेत् ।
अवाप्यते यद्विनयात्सुदर्शने,
नावाप्यते तत्कृतकोट्युपायतः ॥ १७१ ॥
सेवस्व जीवमात्रं त्वं, हृष्टा विनयकर्मसु ।
वन्दस्व महतां पादौ, सोत्साहा स्या गुणग्रहे ॥१७२॥
प्रीत्या च कुरु सत्कारं, पृच्छाऽथ कुशलादिकम् ।
उपकुरु विना स्वार्थं, परार्थं जीवनं वह ॥ १७३ ॥
स्वार्थं विनोपकुर्वन्तः, शोकं गृह्णन्ति नो नराः ।
स्वार्थं प्रत्युपकाराय, तत्र नो परमार्थता ॥ १७४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वार्थादयो न सिद्ध्यन्ति, पश्चात्ताप स्तदा भवेत् ।
परमार्थफलं नस्या—न्निष्फलं स्याच्च जीवनम् ॥१७५॥
स्वार्थं विनोपकुर्वन्ति, ये ते धन्यतमा नराः ।
मत्स्वरूपं लभन्ते ते, कोऽपि नास्त्यत्र संशयः १७६
मदाज्ञया नरा नार्य्य—उपकुर्वन्तु भावतः ।
लभंतां परमां मुक्तिं, विश्वासीभूय कुर्वताम् १७७
आशा नश्यति पुत्रादि—सेविनां स्वार्थमन्तरा ।
निःस्वार्थसेवया भक्त्या, त्वाऽऽत्मधर्मः प्रकाशते १७८
परोपकारशीलाये, कीर्तिमानेच्छया विना ।
उद्यता उपकाराय, स्वाऽपमानं विषह्य च ॥ १७९ ॥
बध्यन्ते ते न मायायां, निःसंङ्गज्ञानसंयुताः ।
मुक्तिधाम लभन्ते ते, तरन्ति भवसागरम् ॥१८०॥
इच्छेत्प्रत्युपकारं नो, धन्यास्ते हि नराः स्त्रियः ।
भेदभावो न चित्तेषु, चोपकारोऽस्ति शत्रुषु ॥१८१॥
उपकर्तुं मनःप्राण,—वित्तकायबलादिकम् ।
अर्पयन्ति समग्रं ये, लभन्ते मत्पदं सुखम् ॥१८२॥
सर्वोपकाररूपोऽस्ति, जैनधर्मस्तमाचर ।
उपकृत्य वदेद्यश्च, स मायाबन्धने स्थितः ॥१८३॥
नामरूपेषु निर्मोहा गुप्तदानविधायिनः ।
ज्ञानदानसमं नान्य—दाऽऽत्म दानं तु सौख्यकृत् १८४

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उपकर्तुस्तिरस्कारः, सङ्कटंमृत्यु रेव वा ।
अपकीर्तिर्वधो बन्धः, स्या ज्ज्ञानी नाऽत्र शोचति १८५
त्वं वन्दस्वोपकर्तारं, तन्नाम नच गोप्यताम् ।
न निन्द्योपकर्तारं, नोपकर्तृवधं कुरु ॥ १८६ ॥
गुरुदेवोपकारो य-स्तं चित्ते स्मर नित्यशः ।
जगज्जीवोपकाराय, सोद्यमा स्याः सुदर्शने ॥ १८७ ॥
यत्कालेऽस्त्युपकारो यः, कुरुध्वं तं नराः स्त्रियः ।
जीवा जीवन्ति नो केचि-दुपकारग्रहं विना ॥१८८॥
फलं बहूपकारेऽस्ति यथाभावं फलं भवेत् ।
कामिनां काम लाभोहि, बहु निष्कामिनां फलम् १८९
परोपकारे त्यज नो स्वनीतिं, परोपकारे कुरु नैव भीतिम्।
नैवोपकारे कुरु खेदलज्जे, सुदर्शने नापि विभेद दुःखे१९०
निष्कामेन सकामेन, भावेनोपग्रहेनृणाम् ।
धनप्राणादिदानेन, मम ज्ञानं प्रकाशते ॥ १९१ ॥
उपकारेऽपकारं च, यदि कुर्युर्नराः स्त्रियः ॥
तर्हि तदुपकारेण, भक्तिमुक्तिश्च निश्चिता ॥ १९२ ॥
उपकारा भवन्त्येते, रजःसत्त्वतमोगुणाः ॥
सत्त्वगुण्युपकारोऽस्ति, भावेनैतान्समाचर ॥१९३॥
उपकारेषु सम्मान्ति, तपोभावव्रतादयः ।
उपकारेषु ते धर्मा-उपकारेऽखिलाः क्रियाः ॥ १९४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उपकारा अनेके ये, यथाशक्तिसुखप्रदाः ।
नैसर्गिकोपकारश्च, प्रकृत्या तस्य जायते ॥ १९५ ॥
जीवन्मृता भवन्त्येते, ये लोका अपकारिणः ।
योगं क्षेमं च ते यान्ति, मच्छ्रद्धाप्रेमधारकाः ॥१९६॥
उपकारैर्यथा भाव–स्तथा धर्मोऽपि वर्द्धते ।
वैरशान्तिस्तथा धर्म–वृद्धिः स्यादुपकारतः ॥१९७॥
दुःखिरोगिजनोद्धारं, कर्तुं भवन्तु तत्पराः ।
उपकारोहि वीराणां, धर्म एवाऽस्ति वर्णिनाम् ॥१९८॥
कुरु यात्रार्थिनां शालां, दानं देह्यभयादिकम् ।
पशुपक्षिनृणां दुःख–नाशेन त्वं सुखी भव ॥१९९॥
भजन्ति नाम मे ये च, हृदि तेषामुपग्रहः ।
परमार्थपरा भक्ताः, स्वार्थं जानन्ति तत्र हि ॥२००॥
तत्रोन्नतिः सुखं शान्ति–र्जैनधर्मो भवेद्यतः ।
हिंसादिदोषनाशःस्या–त्सन्तोषः सर्वदेहिषु ॥ २०१ ॥
बुद्धिसत्त्वादिवृद्धिः स्या–त्सर्वं स्याच्छान्तिकारणम् ।
विस्तृते जैनधर्मे च, सर्वं पापं विनश्यति ॥ २०२ ॥
समाजदेशयोर्वृद्धि–र्जैनधर्मस्य सेवने ।
जैनधर्मेऽखिला धर्माः, कुरु कर्माणि निश्चयात् ॥२०३॥
पालयेद्देशनां मेचे–त्सुखं देशसमाजयोः ।
जैनधर्मक्रियाज्ञाने, यत्र स्तश्च ततः सुखम् ॥ २०४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्रियया यत्र मद्बोधो-वर्तते च तदुन्नतिः ।
मद्बोधे येँ च वर्तन्ते तेषां स्यान्निश्चितं सुखम् २०५
जैनधर्मक्रियाज्ञाना-त्पृथग्भूताश्च ये नराः ।
ते शान्तिसुखतो दूरं, दुःखिनोऽन्योन्ययुद्धतः २०६
नाद्यन्तौ जैनधर्मस्य, सन्तस्ते जैनधर्मिणः ।
मद्रूपं जैनधर्मोऽस्ति, चिदानन्दस्वरूपकम् ॥२०७॥
सत्यानन्दात्मिकज्ञानं, जैनधर्मस्य लक्षणम् ।
गुणकर्माणि वर्णाश्च, सन्ति बाह्योपचारतः ॥ २०८ ॥
मां भजन्भजते धर्मं, जैना जानन्ति मर्म तत् ।
जैनधर्मो मयि प्रोतः, प्राप्यते मम जापतः ॥२०९॥
मद्रागिणां मनुष्याणां, नश्यति कामवासना ।
दोषाः कामादयः सर्वे, नश्यन्ति मद्रतेः खलु ॥२१०॥
मयि यस्य भवेत्प्रीति-स्तस्य नो व्यभिचारिता ।
नाशयेन्मैथुनादिं च, गुणस्तुष्टिः प्रकाशते ॥ २११ ॥
यत्प्रीतिर्मयि सँलग्ना, व्यभिचारो न तद्धृदि ।
अङ्गरूपे सुखाशा चे-त्तदा जाड्यं च दासता ॥२१२॥
यद्धृदि स्यान्मम प्रेम, तत्र कामो न तिष्ठति ।
व्यभिचारी खलकोऽस्ति, ह्यशुभादशुभो महान् २१३
व्यभिचारी क्षितौ दुष्टः, पुष्टो न बलशक्तिभिः ।
व्यभिचारी स्थिरो न स्या-द्रोगी पापी च चञ्चलः २१४



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वेश्यापराङ्गनासक्ता–ये ते चर्मानुरागिणः ।
ये मुग्धाश्चर्मरङ्गेषु, चर्मकारा भवन्ति ते ॥ २१५ ॥
चर्मकारास्तु मद्रूपं, ते न पश्यन्ति मन्महः ।
मयि रक्ताश्च ये जीवा–लभन्तेऽनन्तजीवनम् ॥२१६॥
व्यभिचारं च संहृत्य, ब्रह्मरूपे मयि स्थिताः ।
व्यभिचारिनरा नार्यः, सत्यं तत्प्रेम नो मयि २१७
सर्वशक्तेर्भवन्भ्रष्टो–नाशयन्त्यखिलान्गुणान् ।
दुःखकालस्य दासः सन्, देशसंघविनाशकः ॥२१८॥
अनेकानिंद्यरोगैः स,–पापे देशप्रजां क्षिपेत् ।
व्यभिचारं रुजागारं–विद्धि द्वारमधोगतेः ॥ २१९ ॥
दुःखपरम्परादायी, व्यभिचारोऽतिकुत्सितः ।
व्यभिचारविचारेण, त्वऽपारं दुःखमुद्भवेत् ॥२२० ॥
व्यभिचारस्य न प्रेम, योगक्षेमौ ततः कुतः ।
ब्रह्मचर्येण देशस्य, समाजस्य तथोन्नतिः ॥ २२१ ॥
व्यभिचारेण पातः स्या–द्विश्वासो मयि नोद्भवेत् ।
व्यभिचारसमं पापं, शापश्चाऽपि न तत्समः ॥२२२॥
व्यभिचारी स्थिरो न स्या–न्म्रियते दुःखयोगतः ।
ब्रह्मचर्यं हि मच्छक्ति–र्धृतायां शक्तिरुद्भवेत् ॥२२३॥
ब्रह्मचर्यसमो धर्मो, नोपकारसमा क्रिया ।
देहवीर्यं च रक्ष त्व–माऽऽत्मवीर्यं प्रकाशय ॥२२४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मयि येषां च विश्वासो-ब्रह्मचर्यं प्रविन्दते ।
सुदेहं ब्रह्मचर्य्येण, सुस्थानं ब्रह्मचर्यतः ॥ २२५ ॥
ब्रह्मचर्य्येण सत्ता स्या-द्राज्यं विद्यादिकं तथा ।
रूपे रङ्गे न कामः स्या-द्देहवीर्यस्य रक्षणम् ॥२२६॥
मम विस्मृतियोगेन, गर्वः स्याद्देहरूपयोः ।
मद्विस्मृत्या भवेत्कामो-मानसं न स्थिरं भवेत् २२७
जडमायां मनश्चेच्छे-न्मनो भ्राम्यति भूतवत् ।
शक्तिहीना च निर्बुद्धिः, सन्तति र्व्यभिचारिणाम् २२८
पराधीनो भवेद्दासः स्वतन्त्रः स्यात्कदापि न ।
व्यभिचारिजना यत्र, देवानां तत्र जन्म नो ॥२२९॥
देशसंघादिनाशः स्या-त्का सुखाशा भवेत्ततः ।
विश्वासो मयि पूर्णः स्या-द्व्यर्थकामो न वै ततः२३०
आत्माधीनं भवेच्चित्तं, देशोऽपि लभते सुखम् ।
सुखिनस्ते मनोवाचा-कायैर्निर्व्यभिचारिणः ॥२३१॥
राक्षसादिर्विवाहो य-स्तत्त्यागे सुखिनो जनाः ।
श्रद्धया मां च सेवन्ते, ये नरा व्यभिचारिणः ॥२३२॥
निर्दोषिणो भविष्यन्ति, शुद्धप्रेम्णा सुखास्पदाः ।
शीलार्थे प्राणतन्वादि-नाशने सुखमुद्भवेत् ॥ २३३ ॥
नाऽन्याऽऽसक्ता मदाऽऽसक्ता-ये ते भक्ता भवन्ति मे ।
प्रेम्णा मां भजतः पापि-मनुजानुद्धराम्यहम् ॥२३४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भावप्रमाणसाहाय्यं, मत्कृतं विन्दते जनाः ।
विना रूपाभिधोपाधीन्, रमन्ते मयि ये जनाः २३५
लभन्ते ब्रह्मचर्येण, ब्रह्म तद्धाम मामकम् ।
नास्तिकैः सह संगेन, शीलनाशो भवेद्‌ध्रुवम् ॥२३६॥
नान्तर्बन्धं वह त्वं च, मयि चित्तं निवेशय ।
कोटिलिप्सावलोकेन, व्यभिचारी न मज्जनः ॥२३७॥
भूत्वा मद्भजनाऽऽसक्ता जीवन्तु ब्रह्मचर्यतः ।
सर्वत्र मत्समं भावं, धृत्वैक्यं च प्रवर्तताम् ॥२३८॥
आत्मदाने हरन्भेदं, संघादावेकतां कुरु ।
मत्संघ ऐक्यमारूढो-धर्मवृद्धिं करोतु सः ॥ २३९ ॥
दत्वा च स्वार्थभोगाँस्त्वं, विधेहि योगसाधनम् ।
मां निर्भेदेन सेवस्व, त्यज संकुचितान्मतान् ॥२४०॥
नरा नार्यः क्रियाज्ञानै-र्वर्तन्तां स्वस्वभावतः ।
देशप्रजासुखे सौख्यं, तदुःखाद्दुःखमाऽऽत्मनः ॥ २४१ ॥
ज्ञात्वैकीभूय वर्तन्तां, मिथ्यागर्वं विधत्त न ।
राज्यं सत्तां धनं देहं, संघैक्याय विसृज्यत ॥ २४२ ॥
भेदवन्मतमुन्मुच्य, जैनधर्मं भजस्व च ।
विश्वासो मयि सत्प्रीति-र्जैनत्वस्येतिलक्षणम् ॥२४३॥
मतक्रियादिभेदाँस्तान्, त्यज त्वं संघरागतः ।
विचार्य वर्तते संघ-एवं मच्छासने गुणः ॥ २४४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गच्छेत्कालानुसारं यो, मदाज्ञाराधको गुणी ।
संघैक्यार्थं सदा मुञ्च, क्रियावेषकदाग्रहम् ॥ २४५ ॥
देशकालानुसारेण, लाभाऽलाभस्य बोधतः ।
ज्ञात्वा कालं वहेत्संघो, मदाज्ञाधारकश्च सः ॥ २४६ ॥
संघाद्यैक्यं च यत्राऽस्ति, तत्र शान्तिः सुखं महत् ।
विक्षेपो यदि वाऽऽगच्छे, त्तं निवार्य बली भवेत् २४७
विक्षेपाणां विनाशेन, स्वाऽऽत्मभोगप्रदानतः ।
मद्भक्तिं विन्दते भक्ताः, संघादिक्लेशनाशनात् ॥२४८॥
मनोवचःकायधनादिभोग-
प्रदानतो योग उदेति नूनम् ।
संघादिकैक्ये स्वहितं च बुध्वा,
व्रजन्तु चैक्येन नराश्च नार्यः ॥ २४९ ॥
नैक्यं विना सुखं किञ्चि-न्मद्भक्तिरैक्यमेव हि ।
सर्वस्वार्थान्परित्यज्य, मानं त्यक्त्वैक्यमाचर ॥२५०॥
यूयं तु संघ एव स्थ, म्रियध्वं संघहेतवे ।
संघैक्ये मां च पश्यन्तु, सर्वशक्तेरिदं रहः ॥ २५१ ॥
यत्रैकता स्वर्ग उदेति तत्र,
यत्राऽस्ति नैक्यं नरकोऽस्ति तत्र ।
यत्रैकता तत्र विशालशक्ति-
र्भेदो यत स्तत्र विशालखेदः ॥ २५२ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संघैक्ये वर्द्धते धर्मो–भेदेनाऽधर्म उद्भवेत् ।
अभेदैरैक्यवृद्धिः स्या–द्वृद्धिर्विद्या बलं मतिः ॥२५३॥
सर्वप्रजासु यत्रैक्यं, तत्रैकोऽस्मि विराडहम् ।
ऐक्यं सेवस्व मत्प्रेम्णा, भेदं हानिकृतं त्यज ॥२५४॥
उच्चनीचौ न वा ज्ञेयौ, नृजातौ लिङ्गभेदतः ।
आत्मभावं समादाय, निश्चयेनैक्यमाचर ॥ २५५ ॥
न नामरूपेषु विमोहनीयं,
संघैकताया इदमस्ति गुह्यम् ।
रूपाभिधामोहनिवारणं च,
सुदर्शने धारय मत्सुशिक्षाम् ॥ २५६ ॥
नामोपाधिभिदं त्यक्त्वा, विद्ध्याऽऽत्मानं तु सत्तया ।
सर्वाऽऽत्मा सत्तया त्वेको–ऽवेहि व्यापकभावतः २५७
विद्धि सर्वान्नराँस्तुल्या–न्नामरूपे न मानय ।
नामरूपेषु नो खिन्द, खेदं निस्सारयैक्यतः ॥२५८।
मोहं विस्मृत्य मल्लीना, एकभावेन मां वह ।
ऐक्ये धर्मस्त्वजिन्नोऽस्ति, विद्ध्याऽऽत्मनि सुदर्शने २५९
सर्वाऽऽत्मान श्च मत्तुल्याः, कश्चिद्भेदो न तत्र हि ।
आत्मदृष्ट्या वसैक्ये त्वं, लभन्तां मनुजाः सुखम् २६०
कुरु कर्मैक्यतः सर्वं, मन्तर्निष्कामवृत्तिना ।
संघस्यैक्योपयोगं तु, लोका दुष्टं विधत्त न ॥२६१॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वातन्त्र्यमस्ति संघैक्ये, विनैक्यं परतन्त्रता,
महाजनस्य नीतिः सा, सैक्यरीतिस्तु रक्षति ॥२६२॥
मताचारविचाराभ्यां, वर्तन्ते स्वेच्छया नराः ।
यस्य येच्छा स तां कुर्या–त्तत्र क्लेशं न वाऽऽचर २६३
वर्तन्तां स्वतया लोका–ममाऽभेदे शुचः कुतः ।
यत्कालेनैक्ययोग्यं य–च्छिरोदानेन तत्कुरु ॥२६४॥
दुर्भेदाँस्त्यज मत्प्रेम्णा, संघैक्येन च मां भज ।
जीवनं स्याच्च संघैक्ये, राज्यादिरपि रक्ष्यते ॥२६५॥
रागतो द्वेषतो नाऽपि, पक्षं कुरुत कोविदाः !! ।
पक्षापक्षविनाशाय, चैक्यं कुरुत पण्डिताः ! ॥२६६॥
एकोऽन्यस्य सहायः स्या–न्मद्भक्तः सच कथ्यते ।
हृदि मम परा भक्तिः, संघद्रोहं च नो कुरु ॥ २६७ ॥
वर्द्धस्वैकोऽन्यसाहाय्यै–र्युद्ध्यस्व दुष्टशत्रुभिः ।
कलौ स्वातन्त्र्यमैक्येन, चानैक्ये परतन्त्रता ॥२६८॥
दुर्गुणानां च संहारो–जैनधर्मस्य सम्मतः ।
आत्मप्रीतिं च जैनेषु, कुरु संघस्य रक्षणम् ॥२६९॥
जीवानाऽऽत्मसमान्विद्धि, वृत्तिं नाशय भैदिकीम् ।
न्यायात् पश्चान्न गंतव्यं, भक्तानां स्वार्पणं कुरु २७०
संघं भोजय भावेन, चानन्दं वह सेवया ।
साधर्मिषु परं प्रेम, दीनेषु परमा दया ॥ २७१ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आचार्यसंघसाधूनां, मानं प्रेम परं मयि ।
कुरु साधर्मिणां सेवा–मीर्ष्याद्वेषौ न धारय ॥२७२॥
याते कोट्यपमानेऽपि, मानं साधर्मितो न चेत् ।
सहस्व तदपि स्वान्तः, संघभक्तौ मनः कुरु २७३
विचार्य्य देशकालाभ्यां, विद्धि संघं तु मत्समम् ।
संघं पूजय सेवस्व, क्षणात्कर्माणि संहर ॥२७४॥
संघरक्षणवृद्ध्यर्थं, स्वसाम्राज्यार्पणं कुरु ।
संघसेवैव मत्सेवा, पुण्यं फलति तत्कृतौ ॥ २७५ ॥
कालानुसारतः संघो–नीती रचयते शुभाः ।
राज्यनीतिसमा संघ–नीति स्तां वह कालतः २७६
क्रियाकालानुसारेण, त्यागिनां परिवर्तते ।
तुल्यान्वहेद्गुणान्नीत्या, क्रियायां परिवर्तनम् २७७
संघाधीनं हि जानन्ति, प्रवीणाः परिवर्तनम् ।
सँस्कुर्वन्ति महासंघा–जैनानां वर्द्धते गुणः ॥२७८॥
स्वातन्त्र्यं स्याच्च जैनानां, वर्द्धन्ते बलबुद्धयः ।
निश्चयव्यवहाराभ्यां, बलिसंघो हि वर्द्धते ॥२७९॥
मच्छ्रद्धया विना नाऽस्ति, गति र्नास्ति तथा मतिः ।
मच्छ्रद्धया विना नाऽस्ति, योगो वा सुखमुत्तमम् २८०
मां चित्ते न्यस्य यः कुर्य्या–त्संघो भक्त्याऽश्नुते सुखम् ।
संघानामपमानेन, त्वपमानं ध्रुवं मम ॥ २८१ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यो द्रुह्येन्मम संघेभ्यो–दुर्गतावुद्भवेत्स च ।
गृहस्थत्यागिनां भक्तिः, संघशक्तिं तनोति च ॥२८२॥
जत्ता ये सर्ववर्णानां, जेदस्तत्र न कश्चन ।
संघो हि सर्ववर्णानां, महाँस्तं जज तन्मयः ॥२८३॥
भुक्त्यादिव्यवहाराणां, प्रेम्णा निर्भेदमाचर ।
सर्वसंघस्य यो मुख्यः, सम्मानं तस्य मत्समम् ॥२८४॥
गुणैरग्रेसरः कार्यो–मा मन्दं कुरु नायकम् ।
गुणवान्सर्वतः श्रेष्ठो–यश्च सर्वकलानिधिः ॥ २८५ ॥
न पक्षाऽपक्षतां धेहि, तादृगग्रेसरं कुरु ।
नीतिं सम्मिल्य कुर्वन्तु, संघा ये देशखंडयोः ॥२८६॥
व्यापारंव्यवहारं च, प्रवर्तयत शर्मदम् ।
मम भक्तौ न जेदोऽस्ति, सर्वे तुल्या हि मानवाः २८७
संघैक्यं विश्वलोकानां, तत्रैकः सत्तयाऽस्म्यहम् ।
विधास्यन्ति तथाऽप्स्यन्ति, ज्ञात्वा चित्ते शुजं वह २८८
सुखं स्यात्संघसेवाजिः, सर्वं दुःखं विनश्यति ।
सेवस्व जीवतो भक्त्या, गुणान्पश्य गुणान् वह २८९
न पश्य दोषलेशं च, मनःक्लेशान्निवारय ।
कुर्वऽल्पं त्यज निन्दां च, गुणान्दृष्ट्वा गुणान्वह २९०
गुणानुरागिमद्भक्त–आसक्तो मम कीर्त्तने ।
गुणाकरो महासंघो–मदाज्ञा यश्च रक्षति ॥ २९१ ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विचर तीर्थसेवार्थै, महासंघं विलोकय ।
संघयात्रां प्रकुर्वेतु, सेवन्तां भोजनादितः ॥ २९२ ॥
कुरु संगं सुसाधूनां, तरन्तु भववारिधिम् ।
जैनधर्मविनाशाय, परधर्मी यतेत चेत् ॥ २९३ ॥
धर्मयुद्धंतदा कार्य्यं, शस्त्राद्यैर्बलतस्तथा ।
कुरु व्यर्थं नवा युद्धं, क्रुद्धो न स्या अकारणम् २९४
एकीभूय सहस्व त्वं, शिक्षणानि लभस्व च ।
समर्पयत चाऽत्मानं, न मोहं संशयं कुरु ॥ २९५ ॥
ये संकीर्णविचारा हि, संघाऽधोगतिकारकाः ।
स्वातन्त्र्यस्य च हर्तारो—दूरं वसत तत्ततः ॥ २९६ ॥
नव्यजीवनवोद्धारो—विशालाऽऽचारबुद्धयः ।
विश्वस्मिन्व्यापका ये च, तानाचरत हेजनाः॥२९७॥
जीर्णाः संकीर्णतां प्राप्ता— मलीनाः शक्तिनाशकाः ।
अधर्म्याः पातकर्तार—स्तानाचारान्विमुञ्चत ॥२९८॥
शिक्षणं जैनधर्मस्य, लभन्तां प्रेमतो जनाः ।
याच संघेषु मे भक्ति—र्नीतिशक्तिं तनोति सा ॥२९९॥
यत्र संघे ममाज्ञाऽस्ति, कल्याणं तत्र वर्तते ।
यत्र संघेऽस्ति मे गान—मनुभूतिस्तथा सुखम्॥३००॥
यत्संघानां मयि प्रेम, योगक्षेमौ ततो ध्रुवम् ।
कल्याणकोस्स्वो यत्र, तत्र दुःखं न जायते ॥३०१॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ईर्ष्या वैरं यतश्चास्ति, दैवकोपस्तु तत्र हि ।
मत्संघास्तु ततो दूरं, भूत्वा सौख्यानि विन्दते ॥३०२॥
प्रकाशयोग्यकर्माणि, निष्कामेन प्रकाशय ।
गुप्तयोग्यानि कर्माणि, गुप्तत्वेन विधेहि तत् ॥३०३॥
प्रमाणिकतया कर्म, कुर्वन्सत्यं तनोति च ।
धर्मी कदापि दुःखी स्या—दन्ते सुखमवाप्स्यति ३०४

प्रतिगृहं पिता माता, गुरुकुलं च शिक्षणे ।
बालानां शिक्षणं गेहे, दीयतां हेनराः स्त्रियः ॥३०५॥
अध्यापनं योग्यतया शिशूनां,
विश्वासनीयं मम शिक्षणेषु ।
देहालये देवसमान्स्वबाला—
न्सेवस्व तत्तच्छुभशिक्षणैस्त्वम् ॥ ३०६ ॥
भक्तमातुः पितुः पुत्रो—मज्ञानं लभते शुभम् ।
माता पिता भवेद्भक्तः, सन्तानोऽपि शुभो भवेत्३०७
नीतिवन्मातृपितॄणां, सन्तानो नीतिवान्भवेत् ।
गृहे गृहे सुताः कार्या, मातापित्रनुसारिणः ॥३०८॥
बालकेभ्यो नरा नार्यो—विद्यादानं प्रदीयताम् ।
दूरं नास्तिकता कार्य्या, शूराः कार्य्याश्च बालकाः३०९
मातापित्रोर्हि संस्कारा—उत्तरन्ति च बालके ।
मातापितृसमो बालो—धर्मवान्वाप्यधर्मवान् ॥३१०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्रख्याता बालके तात-गुरुमात्रनुसारिता ।
माता शिक्षकतुल्याऽस्ति, पाठयन्ती सुतान्गृहे ३११
बाल्ये विहितसँस्कारा-स्तादृशःसारउद्भवेत् ।
पितरो भाविनो बालाः, शिशुरेव महद्धनम् ॥३१२॥
बालो भूपस्तथा देवो-बालकान्नज शिक्षणैः ।
देशोदयोधनं बालो-नानाभाषां च शिक्षय ॥३१३॥
विचित्रचित्तवपुश्शक्ति-र्बाले व्याप्नोति वेगतः ।
गुणिपुत्रास्ततः स्वर्ग-देशद्रव्याणि बालकाः ॥३१४॥
बालसंघोदये याते, दुष्कृत्यं याति दूरतः ।
बालकान्कुरु वीराँस्त्वं, संगृहाण स्वतन्त्रताम् ॥३१५॥
उत्सर्गेणोदये धर्म-आपद्धर्मस्तु सङ्कटे ।
धर्मा उन्नतिकर्माणि, जायते शर्म तत्कृतौ ॥३१६॥
नीतिज्ञानं च बालानां, कर्मज्ञानं च शिक्षय ।
ज्ञानं च सर्वधर्माणां, तेन सच्छक्तिरुद्भवेत् ॥३१७॥
यच्छक्तिस्तस्य राज्यं स्या-त्साहाय्यं कुरु शिक्षणे ।
जैनधर्मस्य रक्षायां, प्राणार्पणसुशिक्षणम् ॥ ३१८ ॥
न भयैः परतन्त्रः स्या-त्क्रियाज्ञाने स्वतन्त्रता ।
प्राणान्ते न त्यजेन्न्यायं, स्वधर्मव्रतपालकः ॥३१९॥
दुष्टैः पराजितो न स्या-देवं बालो यतो भवेत् ।
धर्मराज्यं ततो विद्या,-सुखं सम्यक्स्वतन्त्रता ३२०

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कुरु देवसमान्बाला-न्वृणु निर्भिस्वतन्त्रताम् ।
बलं विद्याऽथ साम्राज्यं, जैनधर्मस्य जायते ॥३२१॥
भोगः शक्तिर्दया दानं, बालसंघे निरोगिता ।
दुर्गुणव्यसनाद्दूरं, तत्र शक्तिः प्रजायते ॥ ३२२ ॥
बाले स्वतन्त्रता प्रेम, विद्यारोग्यबलानि च ।
सर्वनीतिकलास्ताभि-र्मिथ्यागर्वो न जायते ॥३२३॥
स्थित्वा गुरुकुले विद्यां, विद्यार्थी सेवयाऽऽप्नुयात् ।
धर्माचार्ये विनीतः स्या-त्कदाचिन्न वदेन्मृषा॥३२४॥
लभेत विनयाद्विद्यां, धर्माचार्यं च सेवयेत् ।
ज्ञापयेद्गुरुदेवस्तं, मानवानां शुभाः क्रियाः ॥३२५॥
जैनधर्मस्य वेदाँश्च, रहस्यं ज्ञापयेत्स्फुटम् ।
बालिकाः शिक्षयेदेवं, विनयं प्रेमसेवनम् ॥ ३२६ ॥
लीपिभाषाक्रियाज्ञानं, नानाज्ञानं च शिक्षयेत् ।
शिक्षयेत्तं स्मरेद्याव-द्विद्यार्थी जायते महान् ॥३२७॥
विद्यार्थिगुरुसाहाय्या-ज्जायते सत्यमुन्नतिः ।
पूज्योपकारको देवो-धर्माचार्योऽस्ति शीर्षवत्॥३२८॥
हस्तौ बध्वा प्रणम्योऽसौ, ध्यानं धर्मगुरोः कुरु ।
पठ सर्वकलाः प्रेम्णा, गुरुतः स्वानुभूतितः ॥३२९॥
विद्धि गुरुकुले वासं, बालानामष्टवर्षतः ।
वसेयुर्ब्रह्मचर्येण, गुर्वीपार्श्वे च बालिकाः ॥ ३३० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

योग्यावस्थासु लग्नं स्या-त्सत्यं प्रेम यतो भवेत् ।
यत्राऽऽत्मा गुणकर्मभ्या-मेको लग्नं तदुच्यते ॥३३१॥
एकता यत्र चान्योन्यं, तल्लग्नं प्रणयात्मकम् ।
गुणान्विना यतो लग्नं, विघ्नास्तत्र भवन्ति हि॥३३२॥
नाधर्म्यकामतो लग्न-मात्मैक्ये लग्नमुत्तमम् ।
शुद्धप्रेम यतश्चाऽस्ति, तल्लग्नमवधारय ॥ ३३३ ॥
लग्नं गुणं विना हेयं, सत्सख्ये लग्नमुत्तमम् ।
प्रीतिं विना देहेच्चित्तं, नेच्छालग्नं ततः कथम्॥३३४॥
पत्नी दासी पतिर्दास-औदासीन्यं ततो द्वयोः ।
मयि यत्र न विश्वासः, का लग्नाशा ततो भवेत् ३३५
देहलग्नं पशोस्तुल्यं, मेलो न गुणकर्मणाम् ।
नोन्नतिः पशुलग्नेन, शुद्धप्रीत्या सुखं हितत् ॥ ३३६ ॥
स्वार्थः परस्परं यत्र, न यत्र परमार्थता ।
यत्राऽधार्मिककामाशा, तत्र पत्नी न वा पतिः ३३७
पृथक् कीर्त्यभिलाषः स्या-दपमानं सहेत न ।
भवेदन्योन्यतो निन्दा, तत्र लग्नं न शोभते॥३३८॥
परस्परं मनोभेदः, खेदः क्लेशस्तथा भवेत् ।
नान्योन्येषु मिलेच्चित्तं, तत्र किं लग्नमुत्तमम्॥३३९॥
व्यभिचारो यतो लग्ने, सुखिनो न नरास्ततः ।
गुणकर्म विना पुत्रा, जायन्ते दासदुःखिनः ॥३४०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नीरोगी न तयोर्देहो–बलं बुद्धिर्न वा यतः ।
धर्मप्रेम न वा नीति–स्तत्र का लग्नयोग्यता ॥३४१॥
पतिधर्मो भवेत्पत्यौ, पत्नीषु गुणकर्मणी ।
संस्कारात्सहजादैक्यं, तत्र प्रणययोग्यता ॥ ३४२ ॥
घनाः पतिव्रताधर्माः, शुद्धप्रेम तदादिकम् ।
पतिचित्ताऽनुसारेण, पत्युर्या सहचारिणी ॥ ३४३ ॥
नाऽन्यपुंसा स्मरेद्भोगं, पत्युर्या सहचारिणी ।
पत्यौ प्रेम शुभा दृष्टि–र्धर्मार्थे व्यक्तिसर्जनम् ॥३४४॥
या भूत्वा पतिरूपिणी स्वमनसः, कृत्वा स्वतां दूरतः,
श्रीपत्युर्गुणसौष्ठवं ह्यभिलषे–त्सैवार्यनारी भवेत् ।
मर्यादां प्रतिपालयेन्निजपतौ, नारोपयेद् दूषणं,
निन्देन्नापि पतिं कदापि दयिता, पत्यौ मनो वेशयेत् ३४५
पत्या सार्द्धं या सुखे वाऽस्ति दुःखे,
घोरापत्तौ स्वाऽपमानं सहेत ।
पत्नी सत्यं वर्तते गेहदेवी,
पत्या सार्द्धं विग्रहं नाऽऽचरन्ती ॥ ३४६ ॥
सत्कुर्वन्ती पतिं प्रीत्या, वञ्चयन्ती न वा पतिम् ।
बालाँश्च बालिका रक्षे–त्कुटुम्बादिप्रपालिनी ॥३४७॥
सन्तुष्य संस्मरेद्या मां, यथाऽऽयं व्ययमाचरेत् ।
मनोवाक्कायतो दुःखं, नार्पयेत्क्षुधमाहरेत् ॥ ३४८ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वञ्चया न परपुंसा स्या–च्छीलं रक्षेत्सुखप्रदम् ।
न मुह्येच्चर्मरङ्गेन, शिक्षां मे या च मानयेत् ॥३४९॥
कर्मणा यो मिलेद्भर्ता, तत्रैव प्रीतिमाचरेत् ।
पत्यौ धर्मेच्छया रागं, त्यागं चापि विवर्द्धयेत् ३५०
वैराग्यं प्रतिरागं च, धर्म्यकामा समाचरेत् ।
मिथ्या कटु च न ब्रूया–दुपालम्भान्सहेत सा ३५१
पत्युश्चिन्तां च जानीया–द्बोधयेत्तत्सहायकृत् ।
पत्याऽऽत्मनाचरेत्प्रेम, पतिसौख्यं च कामयेत् ३५२
गोपयेत्पतिमर्माणि, तद्विश्वासं न खण्डयेत् ।
श्वश्रूश्वशुरसन्मानं, गुरुसाधुगुणानुरटेत् ॥ ३५३ ॥
मिथ्याग्रहाँस्त्यजेत्सर्वान्, गम्भीरा मां व्रजेत्परम् ।
विस्मरेन्न सुखे दुःखे, चाभ्यस्येदपि साम्यतः ॥३५४॥
न त्यजेज्जैनमर्यादां, सत्याऽसत्यं विचारयेत् ।
प्राणान्तेऽपि त्यजेन्नैव, धर्मं कुर्याद्गृहक्रियाः ॥३५५॥
सरागा प्रतिवेश्मिन्यां, परनिन्दां न वाऽऽचरेत् ।
गुणार्जने कृतप्रीति–र्भक्तिमूर्तिमती यथा ॥ ३५६ ॥
बालकं पालयेत्प्रेम्णा, विद्यां नीतिं च शिक्षयेत् ।
सत्यं ब्रूयात्प्रियं ब्रूया–द्धर्मे पातिव्रते दृढा ॥३५७॥
वैद्यकज्ञौषधं कुर्य्याद्, गृहे सद्वस्तु पूरयेत् ।
विद्याद्गृहस्थितिं सर्वां, समाना सुखदुःखयोः॥३५८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उदारं स्वमनः कुर्यात्पतितुष्ट्या च शान्तिजाकृ
मनो वाणीं च संयच्छे-न्नोद्धता स्वेच्छया चलेत् ३५९
दीर्घदृष्ट्या चरेत्कर्म, चाऽऽत्मसौन्दर्य मर्थयेत् ।
दध्याद्गुणमहाशोभां, क्लेशं कुर्य्यान्न कोपिता ॥३६०॥
पालयन्ती स्वयं बालं, सेवयेत्पशुपक्षिणः ।
बालवृद्धरुग्नार्त्तांश्च, यथाशक्ति सुसेवयेत् ॥ ३६१ ॥
स्यात्कदाचित्पतिः क्रुद्ध-स्तदा ब्रूयान्न किंचन ।
उचितावसरं ज्ञात्वा, सर्वं स्पष्टं निवेदयेत् ॥ ३६२ ॥
स्वपत्युर्मनसः शङ्कां, छिन्दन्ती खेदवर्जिता ।
कालोचितं प्रवर्तेत, पतिव्रतपरायणा ॥ ३६३ ॥
प्राघूर्णातिथिसन्मानं, व्ययं योग्यं करोति या ।
नोदासीना भवन्ती या, दुःखेषु मयि विश्वसेत् ३६४
सुपात्रोचितदानानि, कुर्वन्ती दुष्टतां विना ।
रक्षेद्ब्रह्मातिमासेषु, भोगे नो मोहयेन्मनः ॥३६५॥
प्रजोत्पत्तिकृते भोगो-धर्म्येण नियमेन च ।
न भ्रष्टा जैनधर्मात्स्या-दपि नष्टे धनादिके ॥३६६॥
पाखण्डिना न च भ्रान्ता, न भ्रष्टा मम भक्तितः ।
शिक्षयित्वा प्रकुर्य्याच्च, सन्तानाञ्जैनधर्मिणः॥३६७॥
मयि श्रद्धा मयि प्रेम, दुःखिजीवे दयालुता ।
निवृत्तौ मां च गायन्ती, मज्ज्ञानं सत्प्रवृत्तिषु ॥३६८॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कुटुम्बं पालयेत्प्रीत्या, पूजयेत्सेवयेद्गुरून् ।
जैनवृद्धौ प्रकुर्य्याच्च, विद्यातनुधनव्ययम् ॥ ३६९ ॥
प्रामाणिकं प्रवर्तेत, तस्याः स्याद्धृदि सन्मतिः ।
मदाज्ञया रतिं कुर्य्या—त्तस्याः स्यादुत्तमा गतिः ३७०
सुलग्नः पतिभावो न, यदि सत्यं विचारयेत् ।
योग्यः स्याद्गुणकर्मभ्यां, निर्दोषी च निरोगवान् ३७१
आत्मभोगश्च निष्कामो—धृतिर्मन्नाम चेतसि ।
नारीं परिणयेत्सैव, यो विद्याल्लग्नयोग्यताम् ॥ ३७२ ॥
प्रतिज्ञापालनं कुर्य्या—न्नान्धः स्यान्नामरूपयोः ।
अन्तः स्याच्छुभरागश्च, सेवाभक्तिर्विरागिता ॥३७३॥
स्वार्पणं जैनसेवायां, मदाज्ञां शिरसा वहेत् ।
विद्यात्सर्वकलाशिक्षां, बुद्धिं मानं च सात्त्विकम् ३७४
कालोचितक्रियावेत्ता, कर्मयोगी शुभप्रदः ।
धीरो वीरोऽथ गम्भीरो—बलवान्पौरुषैर्गुणैः, ॥३७५॥
जानीयाद्ब्रह्मवत्कार्यं—क्षयादिरोगवान्न यः ।
गुणी वाक्कायचित्तै र्यो—लग्नयोग्यः स वै पतिः॥३७६॥
समाजसंघसेवाया—मानन्दी क्लेशवर्जितः ।
उद्योगी साहसी लक्ष्यी, यच्चित्ते सन्ति साधवः॥३७७॥
सहेत कोटिदुःखानि, मच्छ्रद्धामन्तरे वहेत् ।
उदारो ज्ञानवान्प्रेमी, सात्त्विकाहारभोजनः ॥३७८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पत्नीं शूद्रीं न जानीया-त्सर्वशास्त्रं पठेच्छिया ।
जैनधर्मान्न वै भ्रश्ये-द्देशवेषौ नच त्यजेत् ॥३७९॥
मानयेद्देशवेषौ च, यथाऽऽयं व्ययमाचरेत् ।
कुर्यादवश्यकर्माणि, सत्याचारं च पालयेत् ॥३८०॥
मात्रादिगुरुभक्तिं च, कुर्वन्शक्तिं विकाशयेत् ।
पत्न्युपरि न च क्रुध्या-त्पत्न्यादिं प्रतिबोधयेत् ॥३८१॥
नेच्छेद्भोगं परस्त्रीषु, भोगे रोगं विलोकयेत् ।
भावद्रव्यं चरेद्ब्रह्म, रक्षेद्वीर्यादिकं तथा ॥३८२॥
विश्वासी स्याद्गुरौ देवे, वर्तेत पौरुषैर्गुणैः ।
पतिरेवं च पत्नी च, तत्र जैनोन्नतिर्ध्रुवम् ॥ ३८३ ॥
मदर्थं स्वार्पणं कुर्या-ज्जैनधर्मप्रचारकः ।
देहान्महान्तमात्मानं,वेत्ति पतिगुणाकरः ॥ ३८४ ॥
देहादिं साधनं वेत्ति, चाऽऽत्मानं वेत्ति साधकम् ।
पतिर्वर्तेत तज्ज्ञात्वा, चान्ते तस्याऽस्ति मे गतिः॥३८५॥
पत्न्यादिबालवृन्दानां, पोषकः पालकस्तथा ।
दानाऽऽदाने च सोढा स्या-त्कुर्याद्युद्धे पराक्रमम्३८६
शत्रुषु विजयं कुर्व-ञ्जैनरीतिं च पालयेत् ।
समग्रलीपिभाषाज्ञो-निर्लेपश्च गृहास्थितौ ॥ ३८७ ॥
भुक्त्याचारगृहावास-प्रवृत्तौ योग्यवेदकः ।
गर्भाधानादिसँस्कारं, कारयन्कुरुते पुनः ॥ ३८८ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

धर्मयुद्धे चलेदग्रे, भीत्या मोहेन न स्खलेत् ।
सर्वयुक्त्या च शस्त्राद्यै–र्युद्ध्येन्नो पतितो भवेत् ॥३८९॥
नोच्चनीचौ गुणैः कार्यैः, संयमे धारयेन्मनः ।
भ्रांतोऽपि न त्यजेद्धर्मं, योग्यं कर्म सदाऽऽचरेत् ॥३९०॥
सत्पात्रे वितरेद्दानं, गुरुवाणीं निशामयेत् ।
गुरुबोधाद्विदन्सर्वं, साधुवृन्दञ्च मानयेत् ॥ ३९१ ॥
स्वार्थेषु नो भवेदन्धो–दुर्गुणव्यसनं विना ।
गृहे क्लेशं न वा कुर्या–दतिलोभं न वा चरेत् ॥३९२॥
रागिद्वेषिभिदं विद्या–न्नापत्तौ खेदयेन्मनः ।
कुर्यात्सज्जनसंगं च, योग्याऽयोग्यं विचारयेत् ॥३९३॥
व्यापारविद्यादिककर्म कुर्व–
न्निजाऽधिकारेण च धर्म्यकर्म ।
सम्वेदयेच्चाऽखिलजातिनीतिं,
प्रेम्णा मदाज्ञामपि पालयेद्यः ॥ ३९४ ॥
प्रजादिराज्यादिककर्मकुर्व–
न्प्रेम्णा परस्याऽपि सहायकर्त्ता ।
देशस्य राज्यस्य च पालने यः,
कर्म प्रकुर्वन्गुणिरागवान्स्यात् ॥ ३९५ ॥
चरस्थावरतीर्थानां, देवः स्याच्छुद्धसेवया ।
दानं शीलं तपोभावा–न्करोति शुद्धभावतः ॥३९६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संघार्पणफलं सर्वं, निष्काममुपकारिका ।
निराकारं च साकारं, प्रभुं ज्ञात्वा प्रियं चरेत् ॥३९७॥
क्षेत्रकालाऽनुसारेण, विजानीयाच्छुभाऽशुभम् ।
सन्तानान् सबलान्कुर्या–द्विनयादिकसद्गुणैः॥३९८॥
यत्रैवं दम्पती तत्र, स्वर्गश्चाऽस्ति महो मम ।
रागत्यागौ गृहाऽऽवासे, चान्ते सत्यं विरागिता॥३९९॥
अन्योऽन्यं प्रकृतेः साम्यं, लग्नं गुणत्रयाऽऽत्मिकम् ।
दम्पत्योर्जीवनं सौख्ये, विना सत्प्रेम दुर्गतिः ॥४००॥
यदि ज्ञानं गृहाऽऽवासे, भक्तिस्तर्हि सुखं स्वकम् ।
कठिनोऽपि गृहाऽवासः, सरलस्त्वाऽऽत्मभोगतः॥४०१॥
सेवाऽऽतिथ्याऽऽत्मभोगाश्च, गृहाऽवासे भवन्ति चेत् ।
अन्योन्यप्रकृतेर्मेल–स्तदाऽणुव्रतभक्तयः ॥ ४०२ ॥
गृहस्थकर्मयोगी यो–निर्लेपश्च गुणान्वितः ।
आजीविकादिवृत्त्यर्थं, प्रामाण्यं जीवनं वहेत् ॥४०३॥
कामादिकं यदा शाम्ये–त्तदा निर्भीः स्वतन्त्रता ।
गृहावासे निजाऽऽत्मानं, देहाऽध्यासं विना वहेत् ४०४
वर्णास्ते गुणकर्मभ्यां, निर्मोहो नामरूपयोः ।
लीप्साभये विना सत्यं, भावय व्यवहारतः ॥४०५॥
सत्यं वर्द्धेत वैराग्यं, दम्पत्योर्जीवनं यतः ।
मनोरागोभवेच्छुद्धो–रागोऽन्तर्हृदि चोद्भवेत् ॥४०६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

धर्मस्तत्र यतः कर्म, निश्चयव्यवहारतः ।
प्रवृत्तौ धर्ममाज्ञाय, निवृत्तौ शर्म वेदयेत् ॥ ४०७ ॥
दम्पत्योर्जीवनं धर्मे, वहेत्सत्सुखदुःखयोः ।
तुष्टिरन्तर्बहीराग-रोषौ प्राप्तदशासु न ॥ ४०८ ॥
गार्हस्थ्यधर्ममैक्येन, कुर्वन्ती सद्विचारतः ।
गृहस्थजीवनं धर्मं, कुर्याच्चाऽधर्ममुत्सृजेत् ॥ ४०९ ॥
मां स्मरेत्सर्वकृत्येषु, सर्वत्र मां विलोकयेत् ।
सर्वान्ते मां च पश्येद्यो-जानीयाद्गुह्यमान्तरम् ४१०
दाम्पत्यजीवनं तेषां, ये मद्भक्ता नराः स्त्रियः ।
मद्भक्तिबलतो यान्ति, तेऽनन्तमाऽऽत्मजीवनम् ॥४११॥
वैराग्यं चेद्गृहावासे, तदा त्यागः शुभो भवेत् ।
रागस्याऽपेक्षया त्यागं,मद्भक्तिं विन्दते शुभाम्॥४१२॥
रागत्यागौ च चित्तस्य, तज्जागृहि सुदर्शने !!।
अस्त्यौपचारिकत्यागो-रागत्यागौ न चाऽऽत्मसु ४१३
शुभाशुभौ मनोभावौ, ततश्चाऽऽत्मा स्वयं पृथक् ।
शुभाशुभविचारेभ्यो-भिन्नाऽऽत्मधर्मकृद्भव ॥४१४॥
वर्त्ततां गुणकर्मभ्या-मनोन्यस्य ममान्तिके ।
निरासक्त्या भवेच्छुद्धो-बुद्धोऽर्हन्विष्णुरीश्वरः॥४१५॥
पुत्रीपुत्रान्कुरु श्रेष्ठा-न्गृहसूत्रं तु नीतिभिः ।
गुणिनो यदि सन्ताना-राज्यं संघश्च शोभते ॥४१६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उपकारो हि सन्ताने, कर्तव्यो मातृपितृभिः ।
मातरं पितरं विद्धि, तीर्थवत्तौ प्रपूजय ॥ ४१७ ॥
मद्भक्तःप्रभवेद्यःस–मातापित्रुपकारवित् ।
न धर्मी न गुरोर्भक्तो–मातापित्रुपकारहा ॥ ४१८ ॥
मातापित्रोर्मिलेद्याशी–र्यस्य तस्य जयं नहि ।
पित्रोर्दुःखप्रदो दुःखी, सुखी स्याच्च सुखप्रदः ॥४१९॥
दुष्टो मूर्खो न जानाति, मातापित्रोरुपग्रहम् ।
मातापितृविनाशी यो–दुर्गतिर्दुर्मतिर्भवेत् ॥ ४२० ॥
पितरौ सेवते यश्च, स भक्तः परमो मतः ।
प्रातरुत्थाय वन्दस्व, धीःसुखं येन वर्द्धते ॥ ४२१ ॥
मातापितृषु मां पश्य, तद्दोषान्मा विचिन्तय ।
मातापित्रोश्च सद्बोधं, वह तौ मत्समौ भज ॥४२२॥
गुरोर्ज्ञानी स यो वेत्ति, मातापित्रोरुपग्रहम् ।
मिथो जीवोपकारोऽस्ति, वर्ततां तद्विचारतः ॥४२३॥
अपारं दुःखमाप्नोति, योऽपकर्तोपकारिणः ।
नामरूपाद्युपाधींश्च, विस्मरेन्न च गर्वकृत् ॥ ४२४ ॥
सर्वे वारा हि तत्पर्व, कोटिकल्याणमाप्नुयात् ।
नित्यनैमित्तिकावश्य–कर्माण्याकस्मिकानि यत् ४२५
कुर्वंस्तद्गौणमुख्याभ्या–माऽमराज्यं स चाऽश्नुते ।
इन्द्रियाण्यश्वतुल्यानि, दाम्येयुर्हि नराः स्त्रियः ४२६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वशीकृत्य मनस्तिष्ठे-त्सहेताऽपि रुजादिकम् ।
एकीभूय गृहे तिष्ठ, भवाऽन्यस्य गुणग्रही ॥ ४२७ ॥
नोदासीना भवाऽऽपत्तौ, विश्वसीहि मयि स्थिरम् ।
हर्षं वह मयि प्रीत्या, मोहजालं निराकुरु ॥ ४२८ ॥
आत्मोन्नतिकृते सर्वं, ज्ञात्वा विश्वासमाचर ।
समः सर्वास्ववस्थासु, वर्त्तस्वाऽऽनन्दतः सुखी ॥४२९॥
दुःखदृश्यानि शिक्षार्थं, ज्ञात्वा स्या न मनोवशः ।
दोषं कुत्राऽपि नो देहि, सर्वं शिक्षय वस्तुतः ॥४३०॥
एकोऽन्यस्मिन्कुरु प्रीति-मेकोऽन्यक्षेममाचर ।
धर्मभेदान्न दुष्टाःस्युः, पुष्टाःस्युर्गुणरागतः ॥ ४३१ ॥
धर्मभिन्नचित्तभेदेन, स्वाऽऽत्माभेदेन वर्त्तताम् ।
आत्मभिन्नं जडं विद्धि, धर्मः सत्यस्ततो ध्रुवम् ४३२
दृश्यते यत्र यत्राऽऽत्मा, मत्समं प्रेम तत्स्थले ।
आत्मन्येव रसःशुद्धो-यो विन्ते शिवमश्नुते ॥४३३॥
परब्रह्म ततो यत्र, गृहाऽऽवासे नच भ्रमः ।
मद्भक्ता ईदृशा यत्र, तत्र स्वर्गोऽथ सिद्धयः ॥४३४॥
बलं धीराऽऽत्मविश्वासो-यत्र तत्र सुखं ध्रुवम् ।
न सुखं सत्तया लक्ष्म्या, न वा देशादिमोहतः ४३५
असन्तोषी महान्दुःखी, क्रूरो भावोऽस्ति यद्धृदि ।
लक्ष्मीः सत्ता भवेन्नो वा, परं सन्तोषिणां सुखम् ४३६

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अधिकारो गृहस्थानां, देशादीनां च रक्षणे ।
लक्ष्मीं सत्तां च यो रक्षे—त्सुखी स्याद्व्यवहारतः॥४३७॥
दुष्टैर्यो दण्ड्यते नैव, भ्रान्त्या भ्रान्तो न वा भवेत् ।
धूर्तैश्च वञ्च्यते नैव, निर्मायी सरलैः सह ॥ ४३८ ॥

समाजदेशकृत्यानि, कुर्वन्सत्यं च संवदेत् ।
सर्वैः सार्द्धमभेदेन, वर्त्तते नच पापकृत् ॥ ४३९ ॥
एवं यत्र नरा नार्यो—वृद्धा युवकुमारकाः ।
वर्त्तते मङ्गलं तत्र, स्वातन्त्र्यं निर्भयं मनः ॥ ४४० ॥
आत्मभोगो भवेत्तत्र, न पक्षाऽपक्षता भवेत् ।
औदार्येण गृहावासी, कृपणो न बहुव्ययी ॥ ४४१ ॥
वृद्धाज्ञा मन्यते गेहे, प्राणानैक्यार्थमर्पयेत् ।
भेदः स्वार्थो यतो न स्या—त्तत्र सौख्यभृतं गृहम् ४४२
अभियोगशमौ यत्र, मर्यादा लघुवृद्धयोः ।
न्यायलाभोऽस्ति सर्वेषां, क्लेशो नच कुटुम्बिनाम् ४४३
स्यात्क्षमापनमन्योऽन्यं, नोन्मादो नच शत्रुता ।
सत्ताधनतनुत्यागै—रैक्यं शान्तिः सुखं भवेत् ॥४४४॥
नाल्पं नो वाऽधिकं यत्र, चैकोऽन्यत्र प्रसीदति ।
संघे देशे गृहे सौख्यं, गुणैर्दुःखविनाशनम् ॥४४५॥
एकस्याऽन्यहिते प्राणा—श्चात्माऽऽनन्दो यतो महान् ।
यत्र योगः प्रकृत्याऽस्ति, भोगस्तत्र सुखं ततः ॥४४६॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यत्र धर्मः प्रकृत्याऽस्ति, कर्म प्रकृतिभिस्सह ।
प्रकृत्या सह खेलोऽस्ति, निर्लेपेन सुखी भव ॥४४७॥

गृहादयः सन्ति सह प्रकृत्या,
संसार एषः प्रकृतिर्हि यावत् ।
आत्मा तथेयं प्रकृतिर्द्वयं च,
परस्परं तावबलम्बने स्तः ॥ ४४८ ॥

प्रकृत्यालम्बनेनैव, सद्भावैर्मुक्तिमश्नुते ।
प्रकृतिः स्वानुकूला चे–द्व्यक्त आत्मगुणो भवेत् ॥४४९॥

प्रकृतौ रागरोषौ न, पोषः प्रकृतिपालनात् ।
कोऽपि दोषः प्रकृत्या नो, यत्राऽऽत्मा दोषवर्जितः॥४५०॥

न बन्धमोक्षौ प्रकृतौ कदाचि–
न्न बन्धमोक्षौ च निजाऽऽत्मनि स्तः ।
अन्तर्भवेत्स्वाऽनुभवोऽपरोक्षो–
भ्रान्तिर्व्रजेद्दोषततिर्विनश्येत् ॥ ४५१ ॥

अहमेकोऽस्मि यच्चित्ते, तत्र सर्वा हि बुद्धयः ।
दृढाः स्युर्गृहिभक्ताश्च, प्रीतिश्रद्धानतः शिवम् ४५२

बहौ कषाये सति सर्वनाशो–
दूरीतिदुष्टव्यसने विलासः ।
अनीतयस्तत्र तु भीमभीति–
र्देशे समाजेऽबलरीतयश्च ॥ ४५३ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परस्परं विनाशार्थ—मुद्यतन्ते प्रजा यतः ।
सर्वनाशाय वायुः स्या—द्रोगोत्पादस्तथा रणः ॥४५४॥
शिक्षाया मे यतो ह्रास्यं, प्रजानाशो भवेत्ततः ।
शिक्षातो मे विरुद्धश्चे—न्न सुखं देशसंघयोः ॥ ४५५ ॥
वर्त्तते मम शिक्षाभि—र्लक्ष्मीं शान्तिं स चाश्नुते ।
मदाज्ञावर्तने शक्ति—र्विश्वस्मिन्भक्तिरुद्भवेत् ॥ ४५६ ॥
धर्मभेदेन नो युध्य, दुष्टक्लेशं विनाशय ।
सर्वे वै विश्वसन्तानाः, प्रिया आत्मसमा मम॥४५७॥
मा युध्येद्भेदतः कश्चि—न्मां च सर्वत्र पश्यतु ।
ममाऽभेदाज्जगत्पश्य, चैक्यवीरं विलोकय ॥ ४५८ ॥
धर्मो मत्प्रीतिसेवासु, कुरु कर्म मयि स्थिरः ।
अनन्ताऽऽनन्दमाधेहि, शिक्षां स्मर सुदर्शने ! ॥४५९॥
मनोभावेन संसारो—मुक्तिः स्यादाऽऽत्मभावतः ।
आत्मभावे स्थिरो भूत्वा, कुरु कर्माणि मन्मनाः ॥४६०॥
आधारनामरूपेभ्यः, पृथग्मां प्रविलोकय ।
निजज्योतिस्सु संगम्य, स्यादनन्तसुखास्पदः ॥४६१॥
सर्वाऽवस्थासु मन्नाम, निष्कामेन भजन्ति ये ।
मद्भक्तया विन्दते ज्ञानं, तद्दानं ददते पुनः ॥ ४६२ ॥
शुद्धभक्तिस्तथाज्ञानं, यातोऽन्ते त्वेकरूपताम् ।
मृग्यमाणश्च यः शेष—स्तं मां भक्त्या हि विन्दते ॥४६३॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दुग्धाज्यवद्दहं व्याप्तः, काष्ठे वह्निर्यथा तनौ ।
विश्वस्मिन्सत्तया ज्ञात्वा, भजध्वं मां नराः स्त्रियः॥४६४॥
नामरूपादिभिन्नोऽहं, महावीरो जिनेश्वरः ।
स्वाऽऽत्मानं वेत्ति यश्चैवं, स शान्तिं सुखमश्नुते॥४६५॥
भ्रमन्भ्रान्त्या चतुर्दिक्षु, कुर्वन्नाशामनेकशः ।
न तिष्ठति जनव्रातः, पारंमच्छ्रद्धया व्रजेत् ॥ ४६६ ॥
श्रद्धया मम योऽतिष्ठ–देहज्ञावात्स वै मृतः ।
अजीवदाऽऽत्मरूपेण, भूत्वा स मृतजीवनः ॥४६७॥
नित्याऽऽत्मानो यतो जैना–न म्रियन्तेऽपि मारिताः ।
देहप्राणा विनश्यन्ति, चाऽऽत्मा न म्रियते स्वतः॥४६८॥
यन्नाऽऽत्मा म्रियते सत्यं, तत्कृत्यं विद्धि भावतः ।
निश्चयान्म्रियते नाऽऽत्मा, तज्ज्ञस्तु सत्यकर्मवान्॥४६९॥
अविनाशी त्रिकालेऽपि, सोऽनन्ताऽऽनन्दबोधवान् ।
हन्यते पञ्चभूतैर्न, वेत्ति यः सच निर्भयः ॥ ४७० ॥
आत्मानं कोऽपि नो हन्ति, चाऽऽत्मानं कोऽपि नाऽऽहरेत्।
नाऽऽत्मनो जन्ममृत्यू स्तः, कर्ता हर्ता स्वयं हि सः॥४७१॥
आत्मा जैनो जिनो ब्रह्मा, हरो विष्णुर्महाँश्च सः ।
मद्धर्मास्स्वाऽऽत्मपर्यायाः, सर्वे धर्मा इह स्थिराः॥४७२॥
रूप्यरूप्ययमाऽऽत्माऽस्ति, गुरुदेवस्वरूपकः ।
आत्मनो जैनधर्मे तु, सर्वे धर्माः प्रमान्ति हि ॥४७३॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्माऽस्त्ययं देवगुरुस्वरूपो–
धर्मस्वरूपश्च स रूप्यरूपी ।
पश्याऽऽत्मचित्तेषु निजाऽऽत्मखेलं,
शरीरसौधः परमोत्तमोऽस्ति ॥ ४७४ ॥

आजीविकादिक मवश्यकृतिं विधाय,
स्वन्नादिकोचितसुभोजनमप्यवाप्य ।
जीवन्तु नाम वपुरादित एव भव्या–
धर्म्यक्रियां व्यवहृतेरखिलाश्चरन्तः ॥ ४७५ ॥

सर्वोत्तमां कृषिमवेहि सुदर्शने त्वं
स्वातन्त्र्यमस्ति जगतः कृषितस्तु नूनम् ।
न स्यात्कृषिं विदधतां ननु कोऽप्यनर्थो–
भव्याङ्गिनां सकलनीतिषु तत्पराणाम् ॥४७६॥

यन्त्रादिककलाः सर्वा–व्यापारश्चाऽपि मध्यमः ।
जीव्यते चाऽपि विद्यादे–र्जीवनं नोद्यमं विना ॥४७७॥

निर्दोषिणस्ते च नराः स्त्रियःस्यु–
र्ये नीतितः कर्म सदाचरन्ति ।
गृहाश्रमे कर्म विधाय सर्वं,
त्वक्ता ममेमं भवमुत्तरन्ति ॥ ४७८ ॥

कर्माचरन्तो गुणकर्मरीत्या,
न जायते तद्धृदि कोऽपि बन्धः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भक्ता न चोच्चा न हि केऽपि नीचाः,
श्रेष्ठास्तु ते ये न जडेषु रक्ताः ॥ ४७९ ॥
गार्हस्थ्यमेवं प्रतिपालयन्तो–
नराः स्त्रियः स्वश्च शिवं लभन्ते ।
गृहस्थलिङ्गेन समाश्रितानां,
मुक्तिर्भवेदाऽऽत्मसुखानि लब्ध्वा ॥ ४८० ॥
स्यात्त्यागिनां सद्गृहिणां च मुक्ति–
र्ज्ञानं च भक्तिर्भवमुक्तिहेतुः ।
शूरेषु भक्तिः समुदेति पूर्णा,
श्रद्धा च भक्तिश्च तथाऽनुरागः ॥ ४८१ ॥
विद्यास्वसत्ताधनसत्त्वयोगै–
र्जगत्सु जीवन्ति जनाश्च सत्यम् ।
भ्रष्टाश्च तस्माद्विषयान्नरा ये,
हीना हि ते वंशपरम्पराभिः ॥ ४८२ ॥
न्यायो यतस्तत्र सहायकोऽहं,
न्यायो यतस्तत्र च बुद्धिसत्ते ।
यत्राऽऽत्मभोगोऽस्ति ततोऽस्ति शक्ति–
र्निश्शक्तिकास्तेऽतितरां रुदन्ति ॥ ४८३ ॥
निश्शक्तिका ये विषयेषु रक्ता–
स्ते मृत्युतो बिभ्यति पारतन्त्र्यात् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जीवन्ति ये ते प्रभवन्ति वीरा-
गर्वो यतो नास्ति मृषा न मोहः ॥ ४८४ ॥

गर्वादनीतिः समुदेति पूर्णा,
चानीतितः पापमुदेति पूर्णम् ।
पापेन शक्तिर्विलयं प्रयाति,
वपन्ति यतद्धि पुरा लभन्ते ॥ ४८५ ॥

माद्यन्ति मर्त्या धनसत्तया ये,
स्वान्तेषु ते पातमथो लभन्ते ।
योऽन्यायतः कामयते स्वकीर्तिं,
स मानवोऽन्ते लभतेऽपकीर्तिम् ॥ ४८६ ॥

पराऽशुभं ये मनुजाः प्रकामं,
सम्यक् स्वशक्त्यर्थमिहाऽऽचरन्ति ।
अन्ते तु पश्चादनुशेरते ते,
मनोवपुर्भ्यामनयं विधाय ॥ ४८७ ॥

कृतेऽशुभे स्यादशुभं जनाना-
मिन्द्रोनशक्तः कृतकर्ममुक्तौ ।
यादृक् कृतं कर्म फलं च तादृक्,
शर्मापि पुण्यक्रियया‌ऽभ्युदेति ॥ ४८८ ॥

धनं स्थिरं नैव भवेदनीत्या,
शूरोऽप्यनीतेः क्षयमेति काले ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नाऽनीतितो वृद्धिरुदेति चेत्स्या-
रत्साप्यन्तकाले विलयं प्रयाति ॥ ४८९ ॥

नीतिस्ततो यत्र भवेदनीति-
र्वाक्चित्तदेहेषु भवेदशान्तिः ।
सुदर्शनेऽतः प्रतिरक्ष नीतिं,
यत्राऽतिलोभो न हितानि तत्र ॥ ४९० ॥

वृद्धिर्भवेत्स्वाश्रयसिद्धलक्ष्यै-
र्विश्रान्तयः श्रान्त्यपनोदनं यत् ।
सार्द्धं प्रवृत्त्या जगतो निवृत्ति-
र्भवेत्तथैवं परमार्थनीतिः ॥ ४९१ ॥

जगद्भवद्दोषविनाशनार्थं,
चोद्धारणार्थं भविनां जनानाम् ।
तीर्थङ्कराः केवलबोधबुद्धा-
योग्येषु कालेषु च सम्भवन्ति ॥ ४९२ ॥

प्रकाशते त्यागबलेन धर्मो-
वैराग्यतः सन्ति गुणा जगत्सु ।
भक्तिस्ततो यत्र विशुद्धराग-
स्तीर्थङ्करास्तत्र समुद्भवन्ति ॥ ४९३ ॥

प्रयोजनं यस्य यदाऽस्ति काले,
यत्कामयंते भविकाः पुमांसः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कालेे ततस्तद्विशदीकरोति,
तीर्थङ्करः स स्वयमेव भूत्वा ॥ ४९४ ॥
रागरोषविनाशार्थ–मर्हतां जन्म जायते ।
विद्धि तीर्थंकरं ब्रह्म, चार्हन्तं गुणसागरम् ॥ ४९५ ॥
मिथ्यात्वादिविनाशार्थ–मर्हतां जन्म जायते ।
दुर्गुणव्यसनं हन्तुं, धर्मतीर्थं प्रकाशते ॥ ४९६ ॥
दुश्शास्त्रनाशाय तथाऽऽर्यशास्त्र–
प्रकाशनार्थं जगदीशदेवः ।
मिथ्यात्वभावादिकदोषहन्ता,
विज्ञानशास्त्रादिकसर्ववेत्ता ॥ ४९७ ॥
तीर्थङ्करोऽर्हन्भगवान्स बुद्धः,
शुद्धः स्वयं शुद्धविनिश्चयेन ।
कलौ मदाज्ञां प्रकुरु प्रमाणं,
मामन्तिमं तीर्थपतिं च विद्धि ॥ ४९८ ॥
सुदर्शने !! वेदय मां त्वमेवं,
समग्रविश्वोद्धृतिमाविधातुम् ।
ममावतारोऽस्ति विनिश्चयेन,
त्वं विद्धि सत्त्वप्रकृतिं दधानः ॥ ४९९ ॥
विश्वासकर्त्री भव मत्स्वरूपे,
विसृज्य मत्तोऽन्यविकल्पजालम् ।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मदाज्ञया त्वं कुरु कर्म सर्वं,
धर्म्यक्रियाभिर्लभतां पदं तत् ॥ ५०० ॥
आवश्यकोऽयं भुवनेषु धर्मो–
गुणप्रपूर्णोऽस्ति स जैनधर्मः।
लोकास्तु जैना मम भक्तिजिः स्यु–
र्विदन्ति नैवं जडदीनतां ये ॥ ५०१ ॥
अनन्यविश्वास उदेति येषा–
मावश्यकोऽस्मासु सुदर्शने हे ।
जैनाः शुभास्तेऽत्र ममोपदेशं,
स्वाऽऽचारतो ये प्रतिपालयन्ति ॥ ५०२ ॥
निजः परो वेति न भेदलेशो–
भजन्ति मां ये मम तेऽतिभक्ताः।
श्रद्धाचरित्रैः प्रभवन्ति जैना–
मोहादिकान्ये परितो जयन्ति ॥ ५०३ ॥
कषायकर्मोपशमो यथा स्या–
ल्लोकाश्च जैनत्वमथो लभन्ते ।
एकादिकः सद्गुण उद्भवेत्त–
न्मत्सेवका जैनतरा भवन्ति ॥ ५०४ ॥
गुणेन जैनत्वमुदेति सत्यं,
कृते शुभे स्वे परमार्थकृत्ये।

ते मानवाः श्रावकतां लभन्ते,
श्रृण्वन्ति ये नाम ममोपदेशम् ॥ ५०५ ॥
स्युर्ब्राह्मणक्षत्रियवैश्यशूद्रा–
मत्प्रीतितः सद्गुणसागरास्ते ।
सर्वत्र खण्डेषु भवेद्विलासो–
दुखं व्रजेत्स्याच्च परा सुखाऽऽशा ॥ ५०६ ॥
मत्सेवकाश्चिन्तितमालभन्ते,
भूत्वा सुखं जीवनमावहन्ति ।
मुह्यन्ति नो ते विभवेषु किञ्चित्,
परोपकारेण व्रजन्ति हृष्टाः ॥ ५०७ ॥
शुभोपयोगेन जडस्थलक्ष्म्या,
ते साधयन्ति स्वयमाऽऽत्मयोगम् ।
गर्वो न येषां क्षणिके जडेऽस्मि–
न्नष्टे धने शोकलवो न येषाम् ॥ ५०८ ॥
संयोगभावोऽयमचेतनाना,
संयोगतश्चापि भवेद्वियोगः ।
वियोगसंयोगदशासु येषां–
हर्षो न शोको व्रजति प्रकामम् ॥ ५०९ ॥
एवंगृहित्वं व्रजतां नराणां,
मोहादयस्तेऽपसृता भवन्ति ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संघप्रजावृद्धजनादिकानां,
सेवाञ्जिराऽऽत्मा स्वयमेव देवः ॥ ५१० ॥
नानाऽपराधं सहतेऽपरेषां,
शुभाभिलाषी ह्यपराधिनां यः ।
श्रेयस्करी स्या अपराधिवर्गे,
सम्यक्त्वमेतद्गुणतो लभस्व ॥ ५११ ॥
ग्रन्थस्य पाठेन न सर्वलाभः,
सद्वर्तनेनैव सुखानि सन्ति ।
पारं न किञ्चिच्च कृते विचारे,
नराः स्त्रियो धर्मकृतिं कुरुध्वम् ॥ ५१२ ॥
न कार्यसिद्धिर्भवति श्रुतेन,
कार्यं कुरुष्वाशु लभस्व ऋद्धिम् ।
दुःखं पतेच्चापि कुरुष्व कार्यं,
स्वत्वोगतः स्यादिदमाऽऽत्मराज्यम् ॥ ५१३ ॥
शोभा गुणानां तु भवत्यपारा,
न चर्मरंगेषु विमोहनीयम् ।
वेषक्रियातः परमोत्तमास्ते,
चाधो गुणानां निखिलाः पदार्थाः ॥ ५१४ ॥
परोपकारेण न मुह्य किञ्चि-
त्क्लेशोऽपि सह्यः स्वपरार्थमत्र ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नराः स्त्रियः श्रेष्ठतमाः स्वगेहे,
जीवन्ति किञ्चिद्व्ययतोऽपि चारु ॥ ५१५ ॥
व्यर्थव्ययान्किंच न कुर्वते ते,
सर्वार्पकास्ते परमार्थकार्ये ।
उद्योतमाना गुणशास्त्रसत्त्वै-
र्नराः स्त्रियो जीवनमावहन्ति ॥ ५१६ ॥
विश्वोन्नतौ भागमपि प्रदेहि,
सन्त्यज्य विद्याबलबुद्धिदेहान् ।
एकं न कुर्यादशुभं विचारं,
विश्वासिनः सन्तु नराः स्त्रियश्च ॥ ५१७ ॥
दत्वा स्वभोगं सहते त्रुटिं स्वां,
द्वयं समं साधयते स्वधर्मम् ।
गृहाश्रमे प्रार्थयते विरक्तिं,
त्यागं विधातुं स नरोऽधिकारी ॥ ५१८ ॥
ईदृग्गुणाः सन्ति नराः स्त्रियो या-
भक्तिं मदीयां सहसा लभन्ते ।
तीर्थङ्कराः श्रीऋषभादयो म-
त्पूर्वं बभूवुः प्रलयोऽपि यातः ॥ ५१९ ॥
एवं च निर्धारय सर्वखण्डे,
भवन्ति तत्तत्परिवर्त्तनानि ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मनुष्यजातिः खलु पंचवर्णा,
अर्हन्त एतेऽपि च पंचवर्णाः ॥ ५२० ॥
बह्वारचक्राणि परिभ्रमन्ति,
सारोहपातास्तु युगा अनन्ताः।
आत्मा प्रकृत्या सह सद्विकाशी,
सानुक्रमं तानि तथा स विन्ते ॥ ५२१ ॥
ज्ञानं च सर्वानुभवान्स विन्ते,
चान्ते स्वयं श्रीजिनगवान्भवेत्सः ।
ईदग्भवेत्स्वोन्नातिकर्मबोधः,
स्यात्सत्तयाऽन्ते भगवान्स्वयं सः ॥ ५२२ ॥
स व्यक्तितः स्यात्परमाऽऽत्मदेवो–
नश्यन्ति सर्वावरणानि तस्य ।
निजान्तरे जाग्रत भव्यलोका–
स्त्यागी भवेच्छ्रेष्ठतमो गृहस्थात् ॥ ५२३ ॥
अपास्ततेश्चाखिलवासनानां,
सत्त्यागिभावस्त्वतिदुर्लभोऽस्ति ।
श्रीत्यागिभावः कठिनोऽस्तिपूर्णो–
गृहेषु वासः सुलभो नराणाम् ॥ ५२४ ॥
मृत्वा यथा जीवनमस्ति पश्चा–
ज्ज्ञानन्तु तत्त्यागदशां ममेत्थम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पूर्वं स्वकीयान्मरणान्मृतो यः,
स वर्तते त्यागिदशाधिकारी ॥ ५२५ ॥
जानाति नो योऽखिलवासनानां,
त्यागं स आत्मा भवतीह दासः ।
कुर्वीत सर्वं तु स सर्वजिन्नो,
वेषक्रियादौ नच योऽस्ति मोही ॥ ५२६ ॥
न देशकालप्रतिबन्ध इष्टः,
स स्यात्स्वतन्त्रो न भवेत्स अन्धः ।
तन्त्राणि विश्वस्य विसस्मरुर्ये,
वेषक्रियादौ नच मोहमत्ताः ॥ ५२७ ॥
न वा भवेत्स्वप्रकृतेर्वशे स-
चित्तेन नो यो भुवि बध्यतेऽत्र ।
स्वामी भवेत्स्वप्रकृतेः स आत्मा,
भूत्वा स चार्हन्स्वरिपून्निहन्यात् ॥ ५२८ ॥
ईशः स सत्वप्रकृतिः स देव-
स्तं त्यागिनं सर्वजना भजन्ते ।
सुखालयस्त्यागदशाऽस्ति लोका-
न नामरूपेषु विमोहनीयम् ॥ ५२९ ॥
विश्वोद्धृतिं कर्तुमहं सयत्न-
स्त्यागी च भूत्वाऽस्मि सुदर्शनेहे ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्यागं गृहावासमनु प्रधार्य,
वैराग्यतो विश्वमहं चरामि ॥ ५३० ॥
वैराग्यतो नश्यति चित्तदोषो-
विश्वेषु शान्तिः समुदेति पूर्णा ।
एतज्जगत्स्वस्ति न कोऽपि सार-
श्चिचेत यः संसृतिपारमाप ॥ ५३१ ॥
अनेकभोगादपि नास्ति शान्तिः,
सत्यं तु विश्रान्तिरहो विरक्तेः ।
चित्तस्य विश्रान्तिरहो विरक्तेः,
कामस्पृहा याति मनोभ्रमश्च ॥ ५३२ ॥
विचार्य चित्तेषु ममोपदेशं,
शान्तिं परामाऽऽत्मनि शोधय त्वम् ।
वैराग्यतः स्यादतिनिर्भयत्वं,
तथाऽऽत्मविश्वास उदेति चित्ते ॥ ५३३ ॥
वैराग्यतः स्वाच्छमता च मुक्ति-
र्वैराग्यतस्त्यागिकयुक्तिरस्ति ।
भोगेषु रोगस्य भयं त्ववश्यं,
विवादतश्चाप्यपकीर्तिभीतिः ॥ ५३४ ॥
लक्ष्म्या भवेच्चंचलताप्यवश्यं,
वैराग्यतः स्याद्भवजालमुक्तिः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्यागः स्वतन्त्रत्वमथो सुखं स्या-
स्त्प्रयाति चित्तस्य च कोटिचिन्ता ॥ ५३५ ॥
स्वतन्त्रता चापि पदे पदे स्या-
त्प्रवर्त्तते स्वाऽऽत्मनि सर्वराज्यम् ।
स्यात्त्यागतश्चाशुभरागनाश-
स्त्यागश्च मिथ्याप्रतिबन्धनानाम् ॥ ५३६ ॥
वासो नच स्यादपकीर्तिकीर्त्यो-
र्न व्यक्तिमोहस्य च कोऽपि गन्धः ।
स्यान्नामरूपेषु विमोहनाशः,
कर्तव्यकार्येषु च पूर्णमोदः । ॥ ५३७ ॥
अयोग्यसर्वेप्सितवर्जनेन,
सौभाग्यमायन्ति क्रमाऽऽत्मनि स्यात् ।
यतश्च वैरोपशमा भवन्ति,
सत्योक्तितो भीतिरपैति दूरम् ॥ ५३८ ॥
क्रियासु सत्यं समुदेति पूर्ण,
निष्कामभावेन कृते विधाने ।
आत्माऽस्ति धीरोऽमरशैलतोऽपि,
क्षीराब्धितोऽप्यस्ति महागभीरः ॥ ५३९ ॥
स्वस्मिँश्च निन्दावचनानि यानि,
नयाऽनयं यत्प्रकरोति लोकः ।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तथापि नो तेषु भवेद्विमोही,
त्यजेन्न सत्यं सुनयं विदित्वा ॥ ५४० ॥
मिथ्याक्रियाणां च यतो विसर्गो,
मिथ्यापदार्थेषु यतो विरक्तिः ।
क्षणे क्षणे मां हृदये स्मरन्ति,
ते ज्ञानिनो मुक्तिपथं लभन्ते ॥ ५४१ ॥
स्वतन्त्रतां ज्ञानिजना लभन्ते,
नानाविधाचारविचारमध्ये ।
निषेधतो वा विधितो न बन्धः,
सर्वेषु कार्येषु च ते स्वतन्त्राः ॥ ५४२ ॥
तृणे मणौ वा समभाविनो ये,
त्यागे बहि र्नास्ति हठश्च येषाम् ।
त्यागाच्च रागादपि यान्ति तेऽग्रं,
सन्निर्मलानन्द उदेति यत्र ॥ ५४३ ॥
त्यागस्य भेदास्तु भवन्त्यसंख्या–
नश्यन्ति खेदा हृदि तत्प्रबोधात् ।
मुह्यन्ति नो त्यागिजना य एवं,
विभान्ति तत्राखिलशक्तयश्च ॥ ५४४ ॥
क्षमा मृदुत्वं सरलत्वमुक्ती,
शौचं तपःसंयमरीतयश्च ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कर्माणि मोहेन विना न सन्ति,
त्यागः पुनर्ब्रह्मतया विभाति ॥ ५४५ ॥
रूपे मदीये न कुरुष्व वादं,
वादे कृते हानिरुदेति पूर्णा ।
मच्छ्रद्धया त्वं वस मेऽनुरागा-
त्तस्माच्च मद्रूपमहो लभस्व ॥ ५४६ ॥
एवंप्रभु र्वाप्रभुरस्ति चैवं,
व्याप्योऽस्ति वा व्यापक एष ईशः ।
एवंविधान्सम्प्रति मुञ्च तर्का-
न्विश्वासतो मां सकला भजन्तु ॥ ५४७ ॥
यथा यथा वाऽऽवरणप्रणाश-
स्तथा तथा मेऽनुभवा मिलन्ति ।
भवेन्निजाऽऽत्माऽनुभवस्य दृष्टि-
श्चैष प्रसिद्धोऽस्ति नयो ह्यरूपे ॥ ५४८ ॥
त्यागेन सर्वस्य च सिद्धआत्मा,
ज्ञानेषु सर्वे विषयाः प्रमान्ति ।
ज्ञेयोऽस्ति सर्वो हि निजाऽऽत्मधर्मो-
ज्ञाता निजाऽऽत्मा जडचेतनानाम् ॥ ५४९ ॥
आत्मन्याऽऽत्मैव संमाति मुक्ताऽऽत्मा भवति प्रभुः ।
जीवन्मुक्तदशा याव-त्तावत्कार्या शुभा क्रिया ॥५५०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मयि श्रद्धानुरागाभ्यां, भक्ता भवन्ति मत्समाः ।
मद्रूपीभूय मद्ध्याता, मत्समो जायते ध्रुवम् ॥५५१॥
वीतरागदशां यान्ति, मद्भक्ता आत्मबोधकाः ।
सम्यग्दृष्टिं हृदि प्राप्ताः, सिद्धा बुद्धा भवन्ति ते॥५५२॥
मच्छ्रद्धाभ्रष्टलोकानां, नास्तिकानां न सद्गतिः ।
दुःखं च दुर्मतिस्तेषा–मशान्तिः पतनं भयम् ॥५५३॥
दुर्बलत्वं च दासत्वं, युद्धं क्लेशपरम्परा ।
पशुबलमविश्वासो–दुर्नीतिर्भ्रष्टजीवनम् ॥ ५५४ ॥
अप्रामाण्यमनार्यत्व–मस्थैर्यं शक्तिहीनता ।
दुर्गुणव्यसनैर्भ्रष्टं, जीवनं जडवादता ॥ ५५५ ॥
मच्छ्रद्धायुक्तलोकानां, भक्तानां, सद्गतिर्ध्रुवम् ।
सुखं च सन्मतिस्तेषां, शान्तिश्च प्रगतेर्बलम् ॥५५६॥
प्रकृतियोगमालम्ब्य, स्वाऽऽत्मपूर्णोन्नतेः पदम् ।
यान्ति च कर्मराशीनां, क्षयं कुर्वन्ति सत्वरम् ५५७
स्वातंत्र्यमान्तरं बाह्यं, यान्ति युद्धे निजोन्नतिम् ।
सर्वसङ्गेषु निःसङ्गाः, सद्गुणैराऽऽत्मजीविनः ॥ ५५८ ॥
प्रमाणिकाः सदाचार,–विचारै धर्मजीविनः ।
मदर्थं जीविनः शूरा–भवन्ति मत्समा जनाः ॥५५९॥
आत्मबलं च विश्वासं, स्थैर्यं शक्तिं स्वभावतः ।
आत्मज्ञानं च सन्नीतिं, मुक्तिं यान्ति मयि स्थिराः ५६०

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जडवादे न मुह्यन्ति, यान्ति चाऽऽत्मोन्नतेः क्रमात् ।
सदोर्ध्वगमनं तेषां, विनिपातो न चान्तरः ॥ ५६१ ॥
बाह्यतो दुःखभोगेऽपि, चाऽऽन्तरमाऽऽत्मजीवनम् ।
बाह्यतो दुर्दशायुक्ता-स्तथापि चान्तराश्चते ॥ ५६२ ॥
आत्मानन्दोदधौ मग्ना-ईश्वराः प्रभवो जिनाः ।
मज्ज्ञातारश्च सज्जैना-भवन्ति ध्यानयोगतः ॥ ५६३ ॥
मच्छ्रद्धायुक्तलोकाना-माऽऽत्मबलं प्रकाशते ।
रागद्वेषजयाभ्यासो, निष्फलो नैव जायते ॥ ५६४ ॥
रागद्वेषजयाभ्यासा-न्मोहशक्तिर्विनश्यति ।
प्रान्ते मोहारिनाशेन, जीवः सिद्धः प्रजायते ॥५६५॥
मच्छ्रद्धाभ्रष्टलोकानां, विनिपातः सहस्रधा ।
बाह्यत इन्द्रतुल्यास्ते, चान्तरे कीटसदृशाः ॥५६६॥
आत्मज्ञानसुखार्थं स्यु,-र्मज्जैनानां विपत्तयः ।
प्रतिकूलश्च यत्तेषां, प्रत्युत मुक्तिहेतवे ॥ ५६७ ॥
पुण्योदयेन सातं स्या-दसातं पापकर्मतः ।
साताऽसाताविभिन्नोऽस्ति, स्वाऽऽत्मानन्दो निजाऽऽत्मनि ॥ ५६८ ॥
आत्मन्येव सुखं सत्य-मस्ति ज्ञानाद्विलोकय ।
मा भ्रम बाह्यभोगेषु, सुखार्थं वच्मि सद्वचः ॥५६९॥
रागस्य हेतवो ये ये, ते ते वैराग्यहेतवः ।
भवन्ति मम जैनानां, भोगाः स्युर्योगहेतवे ॥५७०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पूर्वजन्मनिबद्धस्य, निकाचितस्य कर्मणः ।
शुभाऽशुभोदये मज्ज्ञा-हर्षं शोकं न विन्दते ॥५७१॥
सर्वकर्मप्रकुर्वाणा-अपि भिन्ना हि सर्वतः ।
सर्वस्मिन्नपि भिन्नास्ते, सर्वतः कर्मयोगिनः ॥५७२॥
नीचेष्वपि हि नीचा ये, भवन्त्युच्चा मदाश्रयात् ।
अनादिकर्मयुक्तास्ते, कर्ममुक्ता भवन्ति हि ॥५७३॥
मदुक्ततत्त्वबोधेन, स्वाऽऽत्मशुद्धिर्भवेद्द्रयात् ।
स्वातन्त्र्यमाऽऽत्मराज्यस्य,स्वान्ते नूनं प्रकाशते॥५७४॥
भवन्ति मत्समा जैना,-ज्ञानचारित्रयोगतः ।
मोहादिकर्मणां शीघ्रं, क्षयं कुर्वन्ति मत्पराः ॥५७५॥
मद्भक्तानां बलं बुद्धिः, शान्तिस्तुष्टिः सुखं यशः ।
पुष्टिर्निजाऽऽत्मनः शक्ति-रात्मस्थैर्यं प्रकाशते ॥५७६॥
मम धर्मे वरं मृत्यु-रन्यधर्मो न शर्मदः ।
इतिनिश्चित्य मद्भक्तिं, कुर्वन्ति यान्ति ते शिवम् ५७७
विभिन्नसर्वधर्मस्थाः, प्रान्ते प्राप्य मदाश्रयम् ।
समत्वेन हि संयान्ति, मुक्तिं तत्र न संशयः ॥५७८॥
आन्तरं मत्स्वरूपं हि, समत्वं परमं महत् ।
प्राप्नुवन्ति हि ये लोका-मुक्तिं यान्ति हि ते ध्रुवम् ५७९
साम्ययोगेन तिष्ठन्तो-जनाः कर्तव्यकारकाः ।
कर्मभिर्नैव बध्यन्ते-मत्स्वरूपोपयोगिनः ॥ ५८० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्मशुद्धोपयोगेन, यत्र तत्र यदा तदा ।
सर्वविश्वस्थलोकानां, मुक्तिर्भवति निश्चयः ॥ ५८१ ॥
विश्वोद्धाराय धर्मस्य, प्रचारो जगति ध्रुवम् ।
मया प्रक्रियते नूनं, विश्वदुःखविनाशकृत् ॥ ५८२ ॥
अधर्मदुःखनाशार्थं, धर्मसंस्थापनाय मे ।
जन्माऽभूत्तीर्थकृन्नाम्ना, विश्वस्य शान्तिहेतवे ॥५८३॥
यदा हि धर्मतीर्थस्य, नाशो भवति तत्तदा ।
परेश्वरस्य तीर्थस्य,-कारिणो जन्म जायते ॥५८४॥
पापादुःखं सुखं पुण्यात्, स्वर्गश्च नृभवादिकम् ।
दर्शनज्ञानचारित्रं, मोक्षमार्गो मयोच्यते ॥ ५८५ ॥
मां भजन्ति च ये मुक्त्यै, मुक्तिं यान्ति च ते ध्रुवम् ।
स्वर्गार्थं मां भजन्तो ये, स्वर्गं यान्ति सुनिश्चयः ५८६
सज्जनाः स्वदशायुक्ता-निष्कामिनश्च कामिनः ।
आत्मशुद्धिं प्रकुर्वाणा-भवन्ति मुक्तिसम्मुखाः ॥५८७॥
विद्यार्थी लभते विद्यां, स्त्रीकामो लभते स्त्रियम् ।
वित्तार्थी लभते वित्तं, यशोऽर्थी लभते यशः ॥५८८॥
राज्यार्थी लभते राज्यं, पुण्यार्थी पुण्यभाग् भवेत् ।
धर्मार्थकाममोक्षाणां, प्राप्तिर्मे भक्तितो भवेत् ॥५८९॥
प्रपद्यन्ते यथा ये मां, यादृग्भावेन देहिनः ।
तादृग्भावेन जायन्ते, यथाभावस्तथाफलम् ॥५९०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यादृशो यस्य भावोऽस्ति, तस्य तादृक् फलं भवेत् ।
एवं ज्ञात्वा विवेकेन, सद्भावं हृदि धारय ॥ ५९१ ॥
विचाराचारतद्व्यं हि, फलं भवति देहिनाम् ।
त्यक्त्वाऽशुभं शुभं कुर्या–मा प्रमादं कुरु क्षणम् ॥५९२॥
यादृशो भवितुं कांक्षे–ज्जनो भवति तादृशः ।
यत्नोत्साहबलस्थैर्या–न्मज्जन ईश्वरो भवेत् ॥५९३॥
स्वाऽऽत्मैष सिद्धबुद्धोऽस्ति, मोहावरणसंक्षयात् ।
स्वस्य पराऽऽत्मतां ज्ञात्वा,पराऽऽत्मा भव सत्वरम् ॥५९४॥
अन्तराऽऽत्मा विजानाति, स्वाऽऽत्मानं परमेश्वरम् ।
शुद्धाऽऽत्मा परमेशोऽस्ति, स्वं दीनं नैव भावय॥५९५॥
यद्यपि कर्मसंयोगी, तथाऽपि ज्ञानशक्तितः ।
अन्तर्मुहूर्तकालेन, मुक्तो भवति सर्वथा ॥ ५९६ ॥
ज्ञानध्यानक्रियाभक्ति–सेवाद्यसंख्यसाधनैः ।
आत्मा याति परब्रह्म–परमाऽऽत्मपदं ध्रुवम् ॥५९७॥
माभैषीः कर्मतः किञ्चि–दाऽऽत्मना कर्म नश्यति ।
कर्मतोऽनन्तशक्तिर्हि, वर्त्तते जाग्रदाऽऽत्मनः ॥५९८॥
ज्ञानाऽऽत्मा कर्मभोक्ताऽपि, कर्मनाशं करोति वै ।
कर्मणां निर्जरार्थं हि, ज्ञानिनां भोगराशयः ॥५९९॥
चतुर्दशगुणस्थान–मारोह चोत्तरोत्तरम् ।
मोक्षप्रासादसोपान–माऽऽत्मशुद्धिगुणाऽऽस्पदम् ॥६००॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अर्हन् सिद्धस्तथा सूरि-र्वाचकश्च मुनिस्तथा ।
चारित्रं दर्शनं ज्ञानं,-तप श्चाऽऽत्मैव वस्तुतः ॥६०१॥
आत्मनश्चैव पर्याया अर्हत्सिद्धादिकाः खलु ।
आत्मन्येव सुखं पूर्णं, ज्ञात्वा सन्तोषवान् भव ॥६०२॥
मदालम्बनयोगेन, सर्वजातीयदेहिनाम् ।
आत्मोन्नतिक्रमप्राप्तिः, स्वान्तरे जायते खलु ॥६०३॥
मदाश्रयिमनुष्याणां, योगः क्षेमं भवेत्सदा ।
अलक्ष्यं ह्यान्तरं तेषां, स्वाऽऽत्मशुद्धिः प्रवर्धते ॥६०४॥
नास्तिक्यं संशयं त्यक्त्वा, त्यक्त्वा च जडवादताम् ।
मदाश्रयप्रपन्नानां, सिद्धिः सुखं च जायते ॥ ६०५ ॥
मत्प्रतिपक्षिभूताश्च, मत्स्वरूपविचारकाः ।
मद्धर्मद्वेषिणः प्रान्ते, मच्चित्ता यान्ति सद्गतिम् ॥६०६॥
एकवारमपि व्यक्ता, रुचिः श्रद्धा ममोपरि ।
येषां तेषां भवेन्मुक्ति-रवश्यं प्रतिपक्षिणाम् ॥६०७॥
अन्तर्मुहूर्तमात्रं यैः, सम्यक्त्वं स्पर्शितं खलु ।
तेषां मुक्तिर्भवेन्नूनं, भवभ्रमणकारिणाम् ॥ ६०८ ॥
सद्देवगुरुधर्माणां, श्रद्धाप्रीतिप्रधारिणः ।
जैना यान्ति जिनत्वं ते, ज्ञानवैराग्यकर्मठाः ॥६०९॥
कोटिस्वार्थानपि त्यक्त्वा, क्षणतः साधुसंगतिम् ।
कुरुष्व श्रद्धया प्रीत्या, सद्भिराऽऽत्मा प्रकाश्यते ॥६१०॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अन्तर्दृष्टिं समाधाय, मत्स्वरूपविचारिणः ।
व्यञ्जयन्त्याऽऽत्मधर्मं ते, ज्ञानानन्दमयं स्वकम् ॥६११॥
जायन्ते पुण्यकर्माणि, सर्वविश्वस्य शान्तये ।
पापकर्माणि हेयानि, सर्वविश्वहितं कुरु ॥ ६१२ ॥
अन्नवस्त्रादिकं देयं, तद्योग्येभ्यो विशेषतः ।
यत्र तत्र गुणा ग्राह्या यस्य कस्यापि देहिनः ॥६१३॥
सद्गुणैः स्वोन्नतिः पूर्णा, दुर्गुणैः पतनं भवेत् ।
दुर्व्यसनैः स्वजीवस्य, विनिपातो भवेत्खलु ॥६१४॥
विश्वसेवास्ति सत्कार्यैं, राऽऽत्मधर्मस्य सेवनात् ।
दुर्गुणानां विनाशेन—विश्वशान्तिस्तथोन्नतिः ॥६१५॥
साहाय्यं दुःखिजीवानां, कर्तव्यं स्वीयशक्तितः ।
विद्याधनादिभि र्गर्वः, कर्तव्यो न कदाचन ॥६१६॥
मैत्रीभावेन विश्वस्य, लोकैः सह प्रवर्तनम् ।
कर्तव्यं न्यायसम्पन्न—वित्तेन, भोजनादिकम् ॥६१७॥
स्वागतं साधुवर्गस्य, कर्तव्यं वृद्धसेवनम् ।
अतिथेःसेवनं कार्यं, सेव्या निजोपकारिणः ॥ ६१८ ॥
यथा यथा कषायाणा—मुपशान्तिस्तथा तथा ।
वर्त्तितव्यं विशेषेण, निजाऽऽत्मशुद्धिहेतवे ॥ ६१९ ॥
अनीतिः परिहर्तव्या, वर्तितव्यं च नीतितः ।
स्वदोषाणां विनाशाय, यतितव्यं स्ववीर्यतः ॥६२०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कर्तव्या स्वाऽऽत्मनः शुद्धिः, सर्वोपायैर्विवेकिभिः ।
आत्मशुद्धिं विना विश्व—सेवाकर्म तु दुर्लभम् ६२१
निर्विकल्पदशाप्राप्त्या, निर्विकल्पं सुखं भवेत् ।
ज्ञानानन्दमयः पूर्ण—आत्मा प्राप्यो निजाऽऽत्मना६२२
मदाज्ञापालका लोका, आत्मविश्वासियोगिनः ।
सर्वशक्तिप्रकाशार्थं, शक्ता भवन्ति सर्वथा ॥ ६२३ ॥
आत्मन्येव सुखं शान्तिं, निश्चित्य चोपकारिणः ।
साताऽसातविपाकानां, जोक्तारः समभावतः ॥६२४॥
पूर्णं मां हृत्सु धर्तारं, आत्मवीर्यप्रकाशकाः ।
सर्वसङ्गेषु निर्लेपा मज्जना यान्ति मत्सुखम् ॥६२५॥
जीवादिनवतत्त्वानां, पूर्णश्रद्धाप्रधारकाः ।
सद्देवगुरुधर्माणां, श्रद्धावन्तः सुखार्थिनः ॥ ६२६ ॥
जैनार्थं जैनधर्मार्थं, जैनसंघाय मज्जनाः ।
कुर्वन्ति स्वार्पणं सर्व—माऽऽत्मोत्साहात्प्रवर्त्तिताः॥६२७॥
मत्तद्भेदं न कुर्वन्ति, संघसेवासु तत्पराः ।
मज्जैना आत्मनः पूर्ण—ज्ञानानन्दं प्रविन्दन्ते ॥६२८॥
मनोवाक्काययोगानां, सर्वशक्तिप्रकाशकाः ।
मनोवाक्कायपावित्र्य—धारका दोषवारकाः ॥ ६२९ ॥
सर्वधर्मप्रवेत्तारः, सर्वकर्मप्रवेदिनः ।
द्रव्यं क्षेत्रं च कालं च, भावं ज्ञात्वा प्रवर्त्तकाः ॥६३०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यथायोग्यं तत्प्रकुर्वन्ति, स्वाऽऽत्मानन्दरसार्थिनः ।
आत्मानन्दरसोन्मत्ता निश्चयव्यवहारिणः ॥६३१॥
सर्वैर्नयैर्हि तत्त्वज्ञा मच्छ्रद्धातः प्रवर्त्तकाः ।
सर्वविश्वोपकारार्थं, सेवाभक्तिविधायिनः ॥ ६३२ ॥
प्राप्तं मच्छरणं यैस्ते, यान्ति मुक्तिं न संशयः ।
पापेष्वपिमहापापा मुक्तिं यान्ति मदाश्रयात् ॥६३३॥
मयि न्यस्य मनो लोकाः, सर्वकार्यस्य कारिणः ।
निःसंगा आन्तरा भूत्वा, जिना बुद्धा भवन्ति ते ६३४
ममोपदेशवेत्तार–स्तदनुसारवर्तिनः ।
स्वाधिकाराद् यथाशक्ति, प्रान्ते मुक्ता भवन्ति ते ६३५
सत्यं श्रद्दधते लोका–मद्वचांसि शिवार्थिनः ।
मज्जैनास्तेऽवगन्तव्या आर्या हि जैनधर्मिणः ॥६३६॥
वीतरागदशां यान्ति, शुद्धोपयोगधारिणः ।
जन्ममृत्युजरातीता भवन्ति क्षीणमोहकाः ॥ ६३७ ॥
आत्मार्पणं हविर्ब्रह्म, स्वाऽऽत्माग्नावाऽऽत्मना हुतम् ।
शुद्धाऽऽत्मैव प्रगन्तव्य–आत्मधर्मसमाधिना ॥६३८॥
कदाऽपि दुर्गतिर्नैव, सर्वथा मम रागिणाम् ।
मम श्रद्धालुलोकाना–मुन्नतिरान्तरा भवेत् ॥ ६३९ ॥
देवानां सर्वदेवीना–मिन्द्राणां धर्मदायिनः ।
विश्वस्मिन् सर्वजीवानां, सुखशान्तिप्रदेशिनः॥६४०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ममोपदेशमन्तारो मदाज्ञया प्रवर्तकाः ।
शान्तिं तुष्टिं तथा पुष्टिं, सुखं ज्ञानं च विन्दते॥६४१॥
विश्वस्मिन् सर्वजीवानां, मुक्त्यर्थं ये प्रवर्तिनः !
अर्हदादिपदं प्राप्य, सिद्धा बुद्धा भवन्ति ते ॥६४२॥
पुद्गलानन्दिलोकाना–माऽऽत्मानन्दरसाप्तये ।
श्रावकाणां च साधूनां, मया बोधः प्रदर्श्यते॥६४३॥
चतुर्विधमहासंघ–तीर्थस्थापनकारकः ।
तीर्थङ्करः प्रजातोऽस्मि, तीर्थं स्थापयिताऽस्म्यहम्६४४
मम बोधानुसारेण, वर्त्स्यन्ति ये नराः स्त्रियः ।
सद्गतिं मरणप्रान्ते, यास्यन्ति नाऽत्र संशयः॥६४५॥
मद्बोधानां तिरस्कार–कर्तृणां दुष्टचेतसाम् ।
दुर्गतिर्मृत्युतः पश्चात्, जायते पापकारिणाम् ॥६४६॥
गृहस्थानां च साधूनां, मदाज्ञया प्रवर्तनम् ।
आत्मशुद्धिकरं शीघ्रं, भवेदाऽऽत्मसुखप्रदम् ॥६४७॥
गृहस्थैर्गृहधर्मस्य, साधनं स्वाऽधिकारतः ।
कर्त्तव्यं व्रतदानाद्यै–र्निश्चयव्यवहारतः ॥ ६४८ ॥
त्यागिभिः साधुधर्मस्य, पालनं स्वाधिकारतः ।
कर्तव्यं मुक्तिसिद्ध्यर्थं, निश्चयव्यवहारतः ॥ ६४९ ॥
मदर्थे स्वार्पणं सर्वं, कुर्वन्ति ये जनोत्तमाः ।
आधिव्याधिविमुक्तास्ते, भवन्ति निरुपाधिकाः॥६५०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मदर्थं जीविनो लोका मदर्थं कर्मकारकाः ।
निजाऽऽत्मानं महावीरं, कुर्वन्ति हि जिनं प्रभुम्॥६५१॥
सदाचारविचारै हिं, जैनधर्मो जगत्त्रये ।
विश्वस्थसर्वजीवानां, शुद्धिं करोति सर्वदा ॥६५२॥
परस्परोपकारार्थं, यतन्तां भूतले जनाः ।
मनोवाक्कायपावित्र्यं, धरन्तु मुक्तिहेतवे । ६५३ ॥
विश्वलोकान् सुखीकर्तुं, जैनधर्मप्रचारणाम् ।
कुरुध्वं सर्वखण्डेषु, नास्ति धर्मं विना सुखम् ॥६५४॥
मद्बोधं प्राप्य भोलोका दर्शनज्ञानसंयमैः ।
अज्ञानपापकर्मभ्यो रक्षत विश्वदेहिनः ॥ ६५५ ॥
कुर्वन्तु नैव पापानि, पुण्यं कुर्वन्तु मानवाः ।
आत्मज्ञानं हृदि प्राप्य, भवन्तु स्वोपयोगिनः॥६५६॥
त्यक्त्वा मिथ्यात्विकीं बुद्धिं, सम्यग्दृष्टिं धरन्तु भोः ।
दशां वैभाविकीं त्यक्त्वा, स्वाभाविकीं धरन्तु भोः६५७
दुर्लभं दशदृष्टान्तै–र्लब्ध्वा नृजन्म मोहतः ।
हारयन्तु न सज्जन्म, धर्मं दधतु मानवाः ॥६५८॥
प्रमादाः परिहर्त्तव्या आत्मोत्साहप्रयत्नतः ।
विश्वासो नैव कर्तव्यो मोहस्य मोक्षकांक्षिभिः ६५९
दोषाश्चित्तोद्भवास्त्याज्या आत्मेक्षणाविवेकतः ।
षडावश्यककर्माणि, कर्त्तव्यानि च संध्ययोः ॥६६०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

देवपूजा गुरोः सेवा, तीर्थयात्रा तपो दमः ।
दया दानं च साधूनां, संगः कार्यो दिने दिने ॥६६१॥
आत्मज्ञानं च सद्ध्यानं, कर्त्तव्यं मोक्षकांक्षिभिः ।
आत्मशुद्धस्वरूपार्थं, यतितव्यं क्षणे क्षणे ॥ ६६२ ॥
सम्यग्दृष्टिप्रदातॄणां, गुरूणां हि निजार्पणम् ।
कर्तव्यं नामरूपादि—मोहं त्यक्त्वा विवेकिभिः ६६३
सद्गुणाः सर्वथा ग्राह्या—मोक्षमार्गानुसारिभिः ।
सर्वथा दुर्गुणास्त्याज्या—मोक्षमार्गविरोधिनः ॥६६४॥
आर्तध्यानं तथा रौद्र—ध्यानं त्याज्यं विवेकतः ।
धर्मध्यानं तथा शुक्ल—ध्यानं ध्येयं विवेकिभिः॥६६५॥
दुष्टलेश्याः परित्याज्या ग्राह्या लेश्याः शुभा जनैः ।
सात्त्विकाऽऽहारपानाद्यैः, कर्तव्या चित्तशुद्धता ॥६६६॥
साधर्मिकस्य संघस्य, वात्सल्यं भक्तिभावतः ।
सूरिवाचकसाधूनां, साध्वीनां भक्तिसेवनम् ॥ ६६७ ॥
जैनधर्ममहाराज्य—ध्वजः सूर्यशशांकयोः ।
चिह्नयुक्तः प्रकर्त्तव्यः, स्थाप्यः पूज्यो महोत्सवैः ॥६६८॥
चतुर्विधस्य संघस्य, पूजनं भक्तिभावतः ।
साहाय्यं धर्मिलोकानां, जैनधर्मप्रवृद्धये ॥ ६६९ ॥
शुद्धाऽऽत्मराज्यसज्ज्ञान—पूर्णानन्दाऽऽप्तये ध्रुवम् ।
यतितव्यं हि सत्प्रीत्या, श्रद्धया जैनधर्मिभिः ॥६७०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

समाजदेशादिहितक्रियायां,
व्यापारणीयं तु सदा स्वचित्तम् ।
परोपकारो निजसर्वयोगै–
रेतत्कृते त्यागिजनाऽवतारः ॥ ६७१ ॥

न त्यागिनां केऽपि भवन्ति दोषा–
स्ते रागरोषै र्न भवन्ति बद्धाः ।
आयुःक्षये मुक्तिरथाऽस्ति तेषां,
स्यात्त्यागिनां स्वानुभवः प्रमाणम् ॥ ६७२ ॥

सत्त्यागिनो मत्सदृशोत्तमास्ते,
तेषां पुरोऽन्ये तु भवन्त्यधःस्थाः ।
न त्यागिनां स्यान्ममतालवश्चे–
त्स्यात्तर्हि नो संयमरागवृत्तिः ॥ ६७३ ॥

हस्ता मदीयाः खलु येषु सन्ति,
तत्त्यागिनां हस्ततलेऽस्ति मुक्तिः ।
कार्यासुखाऽऽशा न जनेषु काचिद्,
सत्या सुखाशा विषयेषु नास्ति ॥ ६७४ ॥

आत्मा स्वयं सौख्यरसाब्धिपूर्णः,
शूरस्तथाऽसौ बहुशक्तितोऽस्ति ।
तद्रागिणस्त्यागिजनाश्च सन्ताः,
शान्ताश्च दान्ताश्च महामहान्तः ॥ ६७५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

साहाय्यमारोहिजनाय दत्ते,
सहायकः स्याच्च यतस्ततोऽपि ।
देशेषु खण्डेष्वखिलेषु गत्वा,
ध्यानं तथा मे हृदये करोति ॥ ६७६ ॥

निजाऽऽत्मशुद्धौ कुरुते प्रयासं,
स्यादाऽऽत्मनः स्वानुभवे प्रकाशः ।
दूरं विदध्यादपि दोषिदोषा-
न्गुणानुरागैस्स्वगुणप्रकाशी ॥ ६७७ ॥

सम्मानयेद्यो जगदाऽऽत्मतुल्यं,
निजः परो वेति भवेन्न मोहः ।
बभूव येषां जगदाऽऽत्मतुल्यं,
तेषां प्रणेशुर्जवबन्धनानि ॥ ६७८ ॥

यो जीवति स्वाऽऽत्मविनोदतो वा,
सर्वं प्रकुर्वन्नपि नो करोति ।
सिद्धश्च बुद्धश्च भवेत्पराऽऽत्मा,
प्रयाति स स्वाऽखिलकर्मपारम् ॥ ६७९ ॥

ईदृग्विधा त्यागिदशा यतोऽस्ति,
पले पले सम्भवति स्वमुक्तिः ।
संत्याग एकोऽस्ति समग्रजूमौ,
सत्यप्रकाशं सहसा विधातुम् ॥ ६८० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सुदर्शने साधुपदं हि सारं,
समुद्धृति र्यज्जगतोऽस्ति तेन ।
सत्यं गृहस्थाश्रमसत्प्रकाशं,
कर्तुं यतस्त्यागिपदं त्ववश्यम् ॥ ६८१ ॥
अङ्गीकरिष्यामि सुसाधुधर्मं,
कार्याणि तीर्थस्य मुदा विधातुम् ।
ममाऽस्ति कार्यं जगतां जनानां,
शान्तिं च विश्रान्तिमथो विधातुम् ॥ ६८२ ॥
आध्यात्मिकव्यष्टिसमष्टिरूपा,
सम्यक्त्वदृष्टि र्हि सुदर्शनाऽस्ति ।
पुरस्तवैवं प्रियसेवकानां,
बोधात्सुखं क्षेममथो सदा स्यात् ॥ ६८३ ॥
सुदर्शनेऽतो भगिनी ममाऽसि,
त्वद्बोधनात्सर्वजनस्य हर्षः ।
जानीहि मां साम्प्रतमाऽऽत्मवीरं-
कुटुम्बवृन्दं तु समग्रविश्वम् ॥ ६८४ ॥
स्वं मानसं चाऽऽत्मवशं प्रकुर्या-
त्स मुक्तिसौख्यं झटिति प्रयाति ।
कुर्वन्ति मां ये शरणं मनुष्या-
भयं च दुःखं च न ते लभन्ते ॥ ६८५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दूरं च मृत्योरथ जन्मतोऽपि,
आत्यन्तिकाऽऽनन्दभरेण पूर्णः ।
न प्राप्नुयाद्यो मरणाच्च भीतिं,
मत्सदृशाञ्नीतिगुणाँश्च धत्ते ॥ ६८६ ॥
आलिङ्ग्य मृत्युं लभतेऽतिहर्षं,
यस्माद्भवेद्भाविमहाप्रकर्षः ।
पारं च तन्मृत्युतिरस्कारिण्या–
आत्मोन्नतिस्तत्र झटित्युदेति ॥ ६८७ ॥
मृत्योर्द्वितीयः खलु पर्यवो यः,
सात्मानमेवं प्रकटीकरोति ।
समत्ववान्ज्ञानिजनःस्वमृत्यौ,
शुद्धस्वभावं लभते स्वकीयम् ॥ ६८८ ॥
ये मृत्युकाले मयि मानसं स्वं,
न्यस्यन्ति ते भक्तजनाः पवित्राः ।
ते मृत्युकाले निजपापपश्चा–
त्तापेन पापानि निवारयन्ति ॥ ६८९ ॥
क्षमापयन्ते ननु ये स्वदोषाँ,
स्तद्रागरोषौ विलयं प्रयातः ।
शुभाऽशुभस्वाऽऽचरणाऽनुसारं,
शुभाऽवतारोऽप्यशुभाऽवतारः ॥ ६९० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मनो हि जन्मान्तरभावहेतुं,
ज्ञात्वेति तद्वर्जनतः प्रसीद ।
शुभाऽशुभत्वं निजभावनानां,
त्यागेन काचिन्न हि कर्मभीतिः ॥ ६९१ ॥
ज्ञानी स्वमृत्योः प्रथमं हि मुक्तः,
पश्चाद्भवेत्सिद्धशिलोपविष्टः ।
धैर्यं परं धारय मृत्युकाले,
चान्तः सुवीर्यं प्रविकाशय त्वम् ॥ ६९२ ॥
आत्मोपयोगेन भवेद्विमुक्तिः,
साऽत्यन्तिकानन्दवती त्रिमुक्तिः ।
न चाऽऽत्मनो मृत्युभयं कदाचि-
च्चाऽऽत्माऽमरो निश्चयतोऽस्ति विद्धि ॥ ६९३ ॥
लीनो भव स्वाऽऽत्मनि निश्चयेन,
स्वान्तश्च दीनो न भवाऽपि किंचित् ।
स्वर्गो मिलेत्स्वीयशुभोपयोगै-
र्निजाऽऽत्मभावेन भवेद्विमुक्तिः ॥ ६९४ ॥
आत्मोपयोगेन सरेत्क्षणं य-
न्मच्छ्रद्धया शैवपदं च लभ्यम् ।
मृत्यौ च येषां न समस्ति चित्तं,
ध्यानेन ये सन्ति मयि प्रसन्नाः ॥ ६९५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्मस्वरूपेण स आत्मरूपो-
भवेन्न तत्राऽस्ति च कर्मभीतिः ।
दयासमो नास्ति जगत्सु धर्मो-
दयासमं नास्ति च कर्म किंचित् ॥ ६९६ ॥

दयां विना नैव मनः पवित्रं,
न्यायो महान्कोऽपि च नो दयातः ।
गृहादयो भान्ति सदा दयातो-
दयालुजन्माऽपि सदा विभाति ॥ ६९७ ॥

अस्यां क्षितौ दुःखिदयासमानो-
धर्मो न कोऽप्यस्ति प्रमाणभूतः ।
हिंसासमं नास्ति जगत्सु पापं,
दयाख्यधर्मेण विभाति भक्तिः ॥ ६९८ ॥

नचाऽपि पेयं रुधिरं पशूनां,
न स्युः प्रवृत्ताः पशुखादनेषु ।
पशून् धनं विद्धि च भारतस्य,
दुग्धेन युष्मानुपकुर्वते ये ॥ ६९९ ॥

कृषौ पशूनां च सहायताऽस्ति,
सौख्यप्रदान्रक्षत तान्गवादीन् ।
शुभोपयोगं कुरु तत्पशूनां,
न किन्तु तेषां वधमाचर त्वम् ॥ ७०० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रोगा विनश्यन्ति हि पङ्क्तिजिस्तु,
ते वर्द्धयन्ते प्रकृतेश्च लीलाम् ।
सर्वेषु खण्डेषु पशूँश्च रक्ष,
प्रकाशते तत्कृतितः शिवं च ॥ ७०१ ॥
गृहे गृहे सत्पशुपालनं स्या-
त्सुखप्रदा तत्र दया मदीया ।
ये दुःखिनोऽशक्तजनाश्च रुग्णा,
दयस्व तेषामुपरि प्रियत्वात् ॥ ७०२ ॥
रक्षा भवेद्यत्र च गर्भिणीनां,
व्यक्ता भवेद्दाढ्विरहो समग्रा ।
सेवा यतः स्याच्च रुजार्दितानां,
यत्रौषधावस्ति धनव्ययश्च ॥ ७०३ ॥
सेवा शुभा यत्र च गर्भिणीनां,
न सङ्कटः किञ्चिदुदेति यत्र ।
विश्वस्य सेवैव ममापि सेवा,
देवो भवेत्केवलसेवनेन ॥ ७०४ ॥
प्रयोजनं यस्य च यत्र काले,
तत्तत्परः स्वोचितकर्म कुर्वन् ।
भवेच्च यः क्षेत्रसमर्थकाल-
ज्ञाता दयादानदमादिकर्ता ॥ ७०५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

साध्वीसतीजिह्नुकहारवाणां,
न ग्राहकाःस्युःखलु दुःखदास्ते ।
दीनांत्रजालं न च दाहनीयं,
विराधनीया मुनयो न केऽपि ॥ ७०६ ॥

ग्राह्या न शापाश्च सतीयतीनाम्
जगत्सु पापानि न वा कुरुष्व ।
न मारयत्वं ननु दुःखिजीवा-
न्निर्दोषिणो वारय हन्यमानान् ॥ ७०७ ॥

अज्ञानतो यैश्च कृतोऽपराध-
स्तेषां क्षमा चेतसि मार्गणीया ।
कदापि जीवान्नहि संहर त्वं,
कुर्याः कुमारीव्रतरक्षणं च ॥ ७०८ ॥

साक्षी मृषा योऽस्ति मृषा च लेखो-
निःसत्यवार्तास्तु सदा उपेक्ष्याः ।
कलङ्कमारोपय केषुचिन्नो,
जानीहि विश्वासममन्यवित्तम् ॥ ७०९ ॥

नचाऽन्यजीवेषु च देहि दुःखं,
सम्बन्धिनां नाशया द्विपत्तीः ।
सन्तापय त्वं न सतो न धेनू-
ऋद्धेर्विनाशोऽस्त्यसुखेन तेषाम् ॥ ७१० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गृहाण न त्वं मम सेवकानां,
हाहारवं ते च न मारणीयाः
प्राणान्हरेद्यो मम सेवकानां,
तद्धानिरस्त्वत्र परत्र योनौ ॥ ७११ ॥
सत्ता च लक्ष्मीश्च मदोऽस्ति येषां,
तेषां समागच्छति नाशआशु ।
दानं न दत्ते कृपणो जनो यः,
सोऽसह्यहानिं लभते तदन्ते ॥ ७१२ ॥
प्रदेहि सौख्यं हृदये परेषां,
कस्याऽपि शापं कुपितो न देहि ।
पापं परेषां हृदयाऽर्दनैः स्या-
द्धर्मप्रभावो न भवेदनीतेः ॥ ७१३ ॥
निवारय त्वं परहास्यनिन्दे,
क्रोधादिकं वारय चित्तजातम् ।
त्वं ब्रूहि नो दुर्वचनानि किञ्चि-
त्सदैव सन्तोलय सत्यवार्ताः ॥ ७१४ ॥
एकाग्रचित्तैः परितो विचार्य,
न्यायेन गच्छन्तु नराः स्त्रियश्च ।
भ्रान्तस्य भूयो भ्रमणं शरीरं,
भक्तिर्मनः शर्म च यान्ति नाशम् ॥ ७१५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विधाय पापं न च मानमिच्छ,
नाऽसत्यमुत्तत्राऽत्र विधेहि दानम् ।
असत्यमाडम्बरमुज्जहीहि,
धृत्वा क्षमां शूरजनो भव त्वम् ॥ ७१६ ॥

यो वाऽपकारोऽस्त्युपकारकर्तु-
स्तस्योपरि त्वं च कुरूपकारम् ।
महान्भवेद्यः सहनं करोति,
शुभस्य कर्ता जगवान्समस्ति ॥ ७१७ ॥

देहः पतेन्न म्रियते महाऽऽत्मा,
देहः पतेत्किन्त्वमरो महाऽऽत्मा ।
मनुष्यजातिं न च धिक्कुरु त्वं,
निन्दां तथा नो श्रृणु कस्यचित्त्वम् ॥ ७१८ ॥

परोक्षनिन्दा परिवर्जनं च,
गुणोपरि त्वं धर पूर्णरागम् ।
कुरु प्रशंसां स्वरिपोर्गुणानां,
तस्मादभावो न च ते गुणानाम् ॥ ७१९ ॥

सत्याच्च्युतान्रक्षति नैव शस्त्रं,
नाऽस्त्रं पुनर्नाशयते सुसत्यम् ।
सत्यं पुरस्कृत्य चलन्तु लोकाः,
पदे पदे तेन शिवानि सन्ति ॥ ७२० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चौर्यादसत्याज्जगतोऽस्ति दुःखं,
सत्यादचौर्यात्पुनरस्ति सौख्यम् ।
सत्येन बुद्ध्वा जगदुद्धृतिं च,
स्त्रियो नराः सत्यपथेन यान्तु ॥ ७२१ ॥

समग्रभाषादिकलेखबोधै-
र्भवन्ति विद्याधनदेहसत्ताः ।
वदन्तु सत्यं च तदाऽऽचरन्तु,
कृत्य न्त्विदं सात्त्विकजीवनस्य ॥ ७२२ ॥

सत्यार्थिनां स्यात्परमा सुखाशा,
विश्वप्रकाशो न च सत्यतुल्यः ।
सत्यस्वरूपोऽस्ति हि जैनधर्मो-
ज्ञात्वेति सत्यं प्रणिरूपय त्वम् ॥ ७२३ ॥

दोषाँश्च निःसारय दोषिणां त्वं,
निर्दोषमाऽऽत्मानमिमं प्रपश्य ।
त्वं विद्धि सर्वानुपयोगिजीवाँ-
स्त्वं सर्वजीवैःसह रागवान्स्याः ॥ ७२४ ॥

पश्याऽऽत्मतुल्यान्सकलान्हि जीवा-
नुपेक्ष्यतां स्वप्रकृतेः स्वभावः ।
गृहाण सर्वस्य शुभाय भागं,
परोपकाराय कुरुष्व दानम् ॥ ७२५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विशालदृष्टिः समुदेति पूर्णा,
मनोऽपि संसारहिताय यायात् ।
सत्येन धर्मेण च जीवतात्त्वं,
निर्दोषसत्प्रीतिमथो कुरुष्व ॥ ७२६ ॥

निवारय त्वं विषयात्स्वरागं,
संज्वालय त्वं स्मरमोहबीजम् ।
निवारय स्वान्तमसाधुमार्गा-
दसहायकस्त्वं भव सज्जनानाम् ॥ ७२७ ॥

आदौ च संसारय वृद्धदोषाँ-
स्तथाऽल्पदोषाँस्तदनन्तरं त्वम् ।
ये दुर्गुणाः शत्रव एव सत्यं,
न तेषु विश्वासमहो कुरु त्वम् ॥ ७२८ ॥

ममोपदेशो यदि विश्वमध्ये,
प्रादुर्भवेत्तत्र सुखं च शान्तिः ।
जीवेद्यतो नाम ममोपदेशः,
प्रादुर्भवेत्तत्र सुखं च शान्तिः ॥ ७२९ ॥

मय्युद्भवेद्विश्वसनं च येषां,
शान्तिः सुखं तत्र भवेदवश्यम् ।
व्याध्याध्युपाधिप्रलयो भवेच्च,
विद्या बलं बुद्धिरथो सुखं स्यात् ॥ ७३० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

एकाग्रचित्तेन मयि स्थिरो यः,
प्रकाशते तेषु विरक्तिबोधः ।
धर्मं च विद्यान्मदभिन्नमेतं,
स शक्तिभिः स्या न्मनुजोऽतिपीनः ॥ ७३१ ॥
विश्वेषु धर्मस्य परं प्रचारं,
कुर्वन्तु भक्ता मनुजाः स्त्रियश्च ।
कुरुष्व देवस्य गुरोश्च मानं,
लीनो मयि स्याः परमप्रवीणः ॥ ७३२ ॥
ये स्त्रीनरा मां न हृदामनन्ति,
तथापि रागं कुरु तेष्ववश्यम् ।
आदाय मैत्रीं च कुरूपकारं,
सत्यं भविष्यन्ति हि रागिणस्ते ॥ ७३३ ॥
आजीविकाद्यर्थसहायता च,
न्यायस्तथाऽन्येषु च धर्मिषु स्यात् ।
भक्तास्त्ववश्यं मम भाविनस्ते,
तेनाप्नुहि त्वं सदपारधर्मम् ॥ ७३४ ॥
स्यात्कर्मणा वा स्वगुणेन वर्णः,
संशोभते भक्तजनश्च भक्त्या ।
आत्मस्वभावे जगतोऽस्त्यभेदो
ज्ञात्वा च सेवस्व सदा ममाज्ञाम् ॥ ७३५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मत्तो न कश्चित्परमेश्वरोऽन्यो–
ज्ञात्वेति सेवस्व सदा ममाज्ञाम् ।
दुस्तर्कबुद्धिं च विधाय दूरं,
श्रद्धानुरागैर्भव पूर्णपूर्णः ॥ ७३६ ॥

मयि प्रमान्त्येव समग्रधर्मा–
ज्ञात्वा शुभं कर्म सदा कुरुष्व ।
भक्तिं सदामत्समसद्गुरूणां,
युगे कलौ सद्गुरुतोऽस्ति शक्तिः ॥ ७३७ ॥

कलौ मदर्चा गुरुसेवया स्या–
च्चत्तया गुरोः शक्तिरहो मदीया ।
भेदौ गुरो स्त्यागिगृहस्थतो द्वौ,
तत्सेवनान्नश्यति खेदराशिः ॥ ७३८ ॥

ज्ञानं तथा श्रीगुरुसेवया स्या–
द्धीर्वाध्धिकग्रन्थविलोकनात्स्यात् ।
तत्सेवया स्वाऽनुभवस्तथा स्या–
त्प्रयाति दूरं च मृषात्वबुद्धिः ॥ ७३९ ॥

किंचाऽपमानेन सतां गुरूणा–
माऽऽत्माऽत्वबोधस्य च विस्मृतिः स्यात् ।
कुलक्षयः सद्गुरुनिन्दया स्या–
न्न तत्र कश्चित्प्रभवत्युपायः ॥ ७४० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गच्छेत्क्षणं नो गुरुमन्तराऽत्र,
प्रादुर्भवद्भक्तिरपि प्रणश्येत् ।
पश्यन्ति ये वा गुरुदूषणानि,
ब्रुवन्ति तेऽन्ते प्रसभं रुदन्ति ॥ ७४१ ॥

तस्माद्गुरूणां भव रागयुक्त-
स्तत्सेवया छिन्धि च कर्मराशिम् ।
कुर्या गुरूणामुपरि क्रुधं नो,
गुर्वन्तिके त्वं शृणु सत्यबोधम् ॥ ७४२ ॥

सुधामुपालम्भमवेहि तेषां,
रमस्व बुद्ध्वा मम भावतस्त्वम् ।
विश्वासरागौ गुरुषु प्रधाय,
भवन्तु शूराः क्रमशश्च लोकाः ॥ ७४३ ॥

भक्ता गुरोर्ये च कलौ युगे स्यु-
र्मत्सेवकाँस्तान्हृदयेन विद्धि ।
कल्याणमालं गुरुसेवया स्या-
न्नश्यन्ति सर्वाश्च कुबुद्धयस्ताः ॥ ७४४ ॥

मत्सदृशे विश्वसनं च येषां,
तेषां च सम्यक्त्वमवश्यमस्ति ।
काले यतो ये गुरवो भवन्ति,
काले ततो मत्सदृशा विबोधाः ॥ ७४५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संरक्ष विज्ञानिगुरुं च शीर्षे,
धीरश्च वीरः प्रभविष्यसि त्वम् ।
सदाऽऽज्ञया ज्ञानिगुरोश्चल त्वं,
स्या बद्धकक्षा गुरुभक्तिषु त्वम् ॥ ७४६ ॥

सद्युक्तिभिर्मण्डय जैनधर्मं,
श्रेष्ठोऽस्त्ययं मत्प्रियभक्तधर्मः ।
विश्वेषु विस्तारयितुं स्वधर्मं,
नराः स्त्रियः सर्वमपि त्यजन्तु ॥ ७४७ ॥

श्रीजैनधर्मप्रतिपक्षिणो ये,
ते शत्रवः सन्ति ममानुगानाम् ।
धर्म्यं च युद्धं रिपुभि र्विधेयं,
धृत्वा कलास्सर्वविधैः प्रयत्नैः ॥ ७४८ ॥

श्रीजैनधर्मः सुखशान्तिदाता,
यतः स मिथ्याभ्रमवारकोऽपि ।
जैना नरा रक्षत जैनधर्मं,
कालानुसारं प्रविधाय कर्म ॥ ७४९ ॥

विरोधिभिर्युध्यत वा म्रियध्वं,
श्रीजैनधर्मप्रतिपालनार्थम् ।
सत्तां धनं बुद्धिबलं लभन्तां,
श्रीजैनधर्माय विधत्त सर्वम् ॥ ७५० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वजीवनं जैनहिताय याया–
स्त्प्रकाशते तत्र ममोच्चभक्तिः ।
जैनाय सर्वं ददतां जनानां,
पर्वाणि सर्वे दिवसा भवन्ति । ॥ ७५१ ॥
विधत्त रक्षां शरणागतानां,
नीत्वा मृतौ हर्षमथो कुरुध्वम् ।
न्यायेन लोकेषु विभान्ति भूपा ।
येऽपक्षपातश्च धरन्ति राज्यम् ॥ ७५२ ॥
आज्ञानुसारं मम राज्यकार्य–
प्रचारतः स्यात्सुखराज्यवृद्धिः ।
कुर्युं नृपाश्चेदशुभाभिलाषं,
नश्यन्ति पृथ्वीरसशान्तयःस्त्राक् ॥ ७५३ ॥
राजा भवेद्दुर्गुणतोऽतिहीनः,
क्षीणाःसुतास्तस्य परम्पराभिः ।
स्वज्ञोगतो राज्यमथो करोति,
ज्ञानं विना स्यात्तमसः समूहः ॥ ७५४ ॥
प्रजासुखार्थं हि भवन्ति भूपा–
न च प्रजादुःखयुताऽस्तितेषाम् ।
योऽनीतितो दण्डयाति स्वलोकाँ–
स्तद्भूपतेर्निश्चित एव पातः ॥ ७५५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जानन्ति ये पुत्रसमाः प्रजाः स्वा-
नृपाभिमानं न तथा धरन्ति ।
यो वर्तते सम्मतितः प्रजानां,
राजा स कीर्तिं लभते प्रकृष्टाम् ॥ ७५६ ॥

परस्त्रियः पश्यति मातृतुल्याः,
कुर्यान्न कस्याऽप्यतिकुप्य घातम् ।
प्राणान्प्रजार्थे प्रददाति यो वा,
सभूपतिर्मानगुणाँश्च विन्ते ॥ ७५७ ॥

प्रजाजने द्वेष्टि न यः कदाचि-
त्प्रजाजनक्लेशनिवारको यः ।
प्रजाजना न्दाससमा न्न कुर्या-
न्मनस्सु मन्नाम मुदा जपन्यः ॥ ७५८ ॥

न राजभावःसुलभोऽस्ति किञ्चिद्,
गुणान्विना भूमिषु दुर्लभः सः ।
नराः स्त्रियो यस्य निजाऽऽत्मतुल्या
जेता नृपो भूमिषु शोभते सः ॥ ७५९ ॥

सर्वप्रजानां ननु सेवको यः,
सर्वप्रजानां ननु रक्षको यः ।
कंचित्प्रजाभ्यः प्रवरं न विद्या-
त्प्रजोन्नतौ प्राणधनादिदाता ॥ ७६० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

एवं नृपः स्वीकरणीय इष्टो–
यः स्वीयदोषान्स्वगुणाँश्च वेत्ति ।
गुणान्विना वंशपरम्पराभि–
र्भूपः प्रजानां बहुदुःखदः स्यात् ॥ ७६१ ॥

देशस्य संघस्य भवेन्निपात–
स्तस्माद्गुणाढ्यो नृपतिर्विधेयः ।
अल्पंलुदोषं च महाप्रलाभं,
यो वेत्ति राजा स गुणैः प्रपूर्णः ॥ ७६२ ॥

राज्यं तु तेषां बलमास्ति येषां,
शक्त्यैव लभ्या पदवी समग्रा ।
पुरस्सरो योऽस्ति च राज्यभूमे–
र्नानागुणाढ्यश्च महान्नवेद्यः ॥ ७६३ ॥

परोपकारेषु रता मनुष्या–
नातिक्रमन्त्येव कदापि नीतिम् ।
सर्वप्रजानां न भवेच्च इष्टो–
नाऽसौ नरो भूपपदे निधेयः ॥ ७६४ ॥

नानागुणाढ्यं च कुरु प्रधानं,
सेनापतिं शक्तिगुणाकरं च ।
भक्ता हि मे सन्ति पुरस्सरास्ते,
सन्त्याकराः शौर्यगुणादिकानाम् ॥ ७६५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

राजादयो यत्र भवन्ति चैवं,
कृपा मदीया तु भवेद्धि तत्र ।
अग्रेसरत्वं मम सेवकैस्त–
द्राज्यादिके कर्माणि संविधेयम् ॥ ७६६ ॥
विश्वेषु सर्वत्र हि जैनधर्म–
प्रचारणार्थं सुखदाऽस्ति सेवा ।
गृहस्थभक्ता निजजन्मदेशं,
संरक्षितुं कर्म सदाऽऽचरन्तु ॥ ७६७ ॥
जन्माऽवनीरक्षणतोऽस्ति धर्मः,
प्रपालय त्वं कुरु कर्म योग्यम् ।
गृहस्थजैना निजसर्वशक्तीः,
संरक्ष्य भक्तिं मनसाऽऽचरन्तु ॥ ७६८ ॥
कालाऽनुसारं च भवेद्गृहस्थ–
जैनप्रजाऽऽचारविचाररीतिः ।
बलादितः शत्रुचयं जयन्ति,
स्वर्गो मनः स्यात्परमाऽनुरागैः ॥ ७६९ ॥
जीवन्त एवम्विधजैनवर्गा–
ये सन्त्यशक्ताः सुतरां मृतास्ते ।
सुदर्शने व्यञ्जय सर्वशक्ती–
स्त्वं संयमे पालय लक्ष्यबिन्दुम् ॥ ७७० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आत्माऽस्त्ययं सँय्यमतो हि सिद्ध-
श्चार्हन्पराऽऽत्मा स हि बुद्धदेवः ।
सुदर्शने विद्धि निजावतारं,
सत्संय्यमैराऽऽत्मसुखप्रदं तत् ॥ ७७१ ॥

स्त्रीत्वेन नार्यः सकला विभान्ति,
नराः पुनः सत्पुरुषत्वयोगैः ।
स्त्रीधर्मतः स्त्रीजनसद्गतिः स्या-
त्सम्यग्यतिः सँय्यमतो विजाति ॥ ७७२ ॥

ईदृक्प्रबोधाऽऽचरणेन सर्वे,
क्लेशा विनश्यन्ति सुदर्शने हे ।
त्वं स्वाऽधिकारेण च विद्धि धर्मं,
निजाऽधिकारेण विधिं विधातुम् ॥ ७७३ ॥

निजाधिकारैः समुदेति शक्ति-
र्व्यक्तिं तथा विद्धि निजाऽधिकारैः ।
निजाऽधिकारेण विना गतिर्नो,
निजाऽधिकारेण विना न बुद्धिः ॥ ७७४ ॥

निजाधिकारैरतिभिन्नभिन्ना-
आनीह्यसंख्यान्निह धर्मभेदान् ।
सर्वे सदाचारविचारधर्मा-
गुणक्रिये चाऽप्यधिकारियोगैः ॥ ७७५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यो दुर्गुणव्यसनबुद्धिनिवारकः स्या-
त्तज्जैनधर्मधरणाज्जगदुन्नतिः स्यात् ।
आत्मादिकोन्नतिरहो प्रभवेच्च यस्मा-
द्धर्मः स एक इह तारकजैनधर्मः ॥ ७७६ ॥

देशस्य संघस्य समुन्नतिः स्या-
त्तत्कर्म धर्मोऽस्ति सुशोभते च ।
स्याद्देशकालानुसृतेश्च नीति-
स्तथैव रीत्याऽस्ति च संघरीतिः ॥ ७७७ ॥

कुनीतिदूरीतिविनाशनेन,
धर्मस्य नीतिः प्रभवेच्च शुद्धा ।
विधेहि सत्कर्म च निर्णयः स-
न्विनाऽऽत्मना नास्ति सुखं जडेषु ॥ ७७८ ॥

शुभाऽशुभां बुद्धिमृते कुरुष्वाऽ
स्त्येषा शुभा मुक्तदशाप्रतिज्ञा ।
वर्तस्व साम्येन वसुन्धरायां,
कुरूपकारं शुभकर्मभिस्त्वम् ॥ ७७९ ॥

त्वं वारयाऽऽन्तस्यतमो यथेच्छं,
त्वं सात्विके कर्मणि धेहि बुद्धिम् ।
अन्ये जनाश्चेन्न सहायकास्ते
तथापि नो धेहि मनःकषायम् ॥ ७८० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्वं स्वाश्रयीभूय जगत्सु गच्छ,
त्वमाऽऽत्मनि स्वान्तमहो निधेहि ।
जातिः प्रमाणं तु गुणक्रियाभ्यां,
न जन्मना जातिरहो प्रमाणम् ॥ ७८१ ॥
जातिर्भवत्येव गुणक्रियाभ्या-
मीदृग्विधैवाऽस्ति सदा ममाज्ञा ।
नचाऽऽत्मनो ज्ञातिरथ स्वजाति-
र्गुणस्य सँस्कारतएव विद्धि ॥ ७८२ ॥
श्रेष्ठः शुभे यद्गुणकर्मणी स्त-
श्चान्योऽस्त्यधस्ताद्धि सतांगुणानाम् ।
विद्ध्युत्तमं सद्गुणिनं मनुष्यं,
नीचं तथा दुर्गुणिनं मनुष्यम् ॥ ७८३ ॥
कुर्याच्छुभाचारविचारतो य
स्तामुच्चजातिं खलु निश्चिनु त्वम् ।
ज्ञानादितः सन्ति हि जातयस्ता,
स्तस्माच्चताः स्वोत्तमतां लभन्ते ॥ ७८४ ॥
ईदृक् तु मच्छासनमस्ति सत्यं,
जानन्ति तेषां सफलं हि कृत्यम् ।
संक्षेपतोऽयं कृतवान्प्रबोधं,
दुष्टाद्विचारात्कुरु चित्तरोधम् ॥ ७८५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चित्तं च रक्षाऽऽत्मनि देशतस्त्वं,
वाण्या च सत्यं वद भूमिमध्ये ।
तनुं च रक्षाऽऽत्मनिदेशतस्त्वं,
चास्वादयाऽऽत्मानुभवं रसं त्वम् ॥ ७८६ ॥
शुद्धाऽऽत्मकीभूय कुरूपकारं,
सुदर्शने सत्यसुखं लभस्व ।
सुदर्शना त्वं भगिनी मदीया,
तस्माच्चिदानन्दमवाप्नुहि त्वम् ॥ ७८७ ॥
तवाश्रयेऽहं निजसेवकानां,
शिक्षा प्रदत्ता च महार्हदीक्षा ।
देवाधिदेवेश सदा जय त्वं,
सुरासुरादिप्रतिसेवितस्त्वम् ॥ ७८८ ॥
प्रभो महावीर सदा जय त्वं,
गुणाकरं च कृतज्ञानप्रबोधम् ।
सार्द्धं मया भक्तजनैश्च सार्द्धं,
अद्यां हि देव प्रतिबोध मेतम् ॥ ७८९ ॥
वेदा अपि त्वां प्रणमन्ति भक्त्या,
हेविश्वविश्राम सदा जय त्वम् ।
मुक्तिस्तु गानेन भवद्गुणानां,
तवोपरि प्रीतिरियं हि भक्तिः ॥ ७९० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वैराग्यसिद्धिस्तवशुद्धरागा-
 स्त्यागोऽपि शुद्धस्त्वयि भक्तितः स्यात् ।
सदा भवेत्त्वच्चरणं ममापि,
 त्वद्दर्शनाच्छान्तिरथो सुखं स्यात् ॥ ७९१ ॥
साकार ईशोऽसि शरीरयोगै-
 र्नरान्स्त्रियस्तारयसे च तेन ।
देहं विना स्यान्न परोपकारः,
 स्याज्जिह्वया देव शुभोपदेशः ॥ ७९२ ॥
तस्माच्च साकार उपग्रही स्या-
 द्वीरप्रभो देव जगच्छरण्य ।
जिह्वात आविर्भवति प्रबोध-
 स्तस्माद्धि वह्नेरुपमाऽस्ति तस्याः ॥ ७९३ ॥
द्रव्यश्रुतीनामसि देव कर्ता,
 भावश्रुतीनामपि कारकोऽसि ।
नयैरनेकैश्च गभीरबोधं,
 ददौ भवान्हे भगवन् कृपालो ॥ ७९४ ॥
पानेन सौख्यं तव वाक्सुधाना-
 मनन्तकालीनमपैति दुःखम् ।
प्रादुर्बभूव प्रभुवीरदेवः,
 सेवा तवाज्ञासु हि देवदेव ॥ ७९५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

धन्योऽस्ति धन्योऽस्ति हि सत्ययज्ञ–
प्रचारणार्थं भवतोऽवतारः ।
कल्याणमूर्ति गृहवासयोग्या,
पूज्या भविष्यत्यथ ते गुणर्द्धिः ॥ ७९६ ॥

कलौ युगे ते शुभजन्मभूमिः
पूज्या भविष्यत्यथ सद्गुणैश्च ।
गङ्गादितः स्नानमहो तवाऽभू–
त्तस्माद्धितास्तीर्थसमा बभूवुः ॥ ७९७ ॥

एता भविष्यन्ति जनेषु पूज्याः
कलौ युगे स्यात्तव भक्तिमानम् ;
चूता वटाः पिप्पलसालवृक्षा–
स्ते क्रीडनस्थानमिमे भवन्ति ॥ ७९८ ॥

राजादनादिस्तत एव तेषां,
भविष्यति स्वादरणं त्ववश्यम् ।
त्वद्दर्शनं चक्रुरिमेऽर्कचन्द्रा–
दयस्ततस्ते खलु दर्शनीयाः ॥ ७९९ ॥

रविः शशी ते विदधे च भक्तिं,
व्यक्तौ ततस्तौ शुभदर्शनस्य ।
त्वां स्थापयित्वा शशिसूर्यमध्ये,
त्वां व्याप्तिभावेन च ते भजन्ते ॥ ८०० ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जक्ता भविष्यन्ति महामहान्तो–
ज्ञानं च लब्ध्वा जवतः कृपातः ।
त्वां न्यस्य सर्वत्र च भूमिगोले,
भजन्ति ते त्वां भगवँल्लभन्ते ॥ ८०१ ॥

कलौ तु वीरो भवितुं नराणां,
सङ्केतितेयं तव देव भक्तिः ।
वीरं भजन्तः प्रभवन्ति वीरा–
अनन्त संजीवनमुल्लभन्ते ॥ ८०२ ॥

वीरप्रभो यत्र तवाऽस्ति दृष्टिः,
प्रादुर्भवेद्व्यष्टिरहो समष्टिः ।
मूर्त्तिंगृहे स्थापयते च यस्ते,
भक्तौ कृतायां तु भवेद्विलासः ॥ ८०३ ॥

मिलन्ति सर्वेप्सितवित्तसत्ता–
स्तव स्वरूपेण रमेत चाऽऽत्मा ।
धन्योऽसि धन्योऽसि जगत्सु वीर,
असंख्यधीरेषु महान्हि धीरः ॥ ८०४ ॥

त्वद्ध्यानतस्तूद्यते समाधिः,
सर्वाधयस्तेन लयं प्रयान्ति ।
त्वय्यास्ति सर्वः सदसत्त्वधर्मो–
नान्योन्यमेतौ कुरुतो विरोधम् ॥ ८०५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ज्ञानादनन्तोऽस्ति भवान्न पारं,
प्राप्नोति सर्वज्ञ मदीयचित्तम् ।
सत्यस्य तीर्थस्य कुरु प्रकाशं,
प्रभो तवाशाऽस्ति जगज्जनानाम् ॥ ८०६ ॥
जगज्जनोद्धारक या गतिस्ते,
मतिर्मदीया न ततः प्रयाति ।
प्रणाशय त्वं बहुपापरीतीः,
कुरु प्रभो दुष्टविचारनाशम् ॥ ८०७ ॥
अन्धं जगत्सर्वमिदं त्वबोधा-
त्तज्ज्ञानिनिर्मोहमथो कुरुष्व ।
पाखण्डजालात्प्रतिरक्ष विश्वं,
शोभस्व हेज्ञातिकुले दिनेश ॥ ८०८ ॥
स्वक्षात्रतेजोभिररीञ्जहि त्वं,
समानभावस्य कुरु प्रकाशम् ।
कुरीतिभेदान्परमोच्चनीचा-
न्विनाशय त्वं जगदेकबन्धो ॥ ८०९ ॥
यज्ञेषु हिंसाश्च निवारय त्वं,
त्वमाश्रयः स्या ऋषिसज्जनानाम् ।
प्रदेहि चार्येभ्य इमं सुबोध-
मार्यास्तु ते सन्ति गुणेन जैनाः ॥ ८१० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

उद्धारय त्वं द्विजजातिसंघं,
त्यागेन बोधेन सुखी यथा स्यात् ।
सर्वत्र विस्तारय देव शान्तिं,
निवारयेर्ष्या विषरूपवैरम् ॥ ८११ ॥
दयां च सम्वर्द्ध्य विश्वजीवे,
विस्तारय त्वं शुभसर्वसत्यम् ।
निवारय त्वं व्यभिचारचौर्ये,
त्वं पक्षपातस्य दहाशु बीजम् । ॥ ८१२ ॥
कुरु त्वमाध्याऽऽत्मिकसत्त्वदानं,
ज्ञानेन सम्पूरय चार्यदेशम् ।
निवारयोपद्रवभीतिरोगा-
न्प्रदेहि जीवेशुभशक्तिसारम् ॥ ८१३ ॥
दुष्कालदुःखानि विनाशय त्वं,
त्वय्यस्ति विश्वास इतो जनानाम् ।
शिक्षाऽनुसारं प्रचलेन्नरो यः,
सारोहमाप्नोति नरस्त्ववश्यम् ॥ ८१४ ॥
अनादिकालीनसमग्रसत्यं,
तवोपदेशे सकलं च कृत्यम् ।
त्रयोदशीयुङ्मधुशुक्लपक्षे,
सुखानि ते जन्म महोत्सवेन ॥ ८१५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

या पूर्णिमा श्रावणशुक्लपक्षे,
प्रबोधयामास शुज्ञानि तस्याम् ।
तिथिश्च सा तेन बभूव पर्व,
पापानि नश्यन्ति यदुत्सवेन ॥ ८१६ ॥

त्रयोदशीसंगतमाघकृष्णो,
क्लेशानृषीणामपनीतवाँस्त्वम् ।
विभुश्च कैलासमवारुरोह,
प्रज्ञोऽस्तितत्प्रर्वं तवोत्सवाय ॥ ८१७ ॥

आषाढमासस्य च पूर्णिमायां,
गुरुव्रतं त्वं जगतां गुरुश्च ।
जगद्गुरोः पर्व च पूर्णिमायां,
बभूव विद्यालयहेतुतश्च । ॥ ८१८ ॥

जगद्गुरुं त्वां कृतवान्महेन्द्र-
स्त्वदष्टवर्षायुषिबोधपूर्णम् ।
त्वं श्रावणे मास्यकरोश्च खेलं,
स पर्वमासः प्रबभूव तेन ॥ ८१९ ॥

स श्रावणश्चोत्तमधर्ममासः,
सदैव सँख्यास्यति हर्षकारी !
नागाः प्रणेमुस्तव पादपद्म,
तेनैव नागाभिधपंचमीति ॥ ८२० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

व्रतोत्सवादौ विहिते च भावे,
प्रवर्द्धमाने भवितातिहर्षः ।
कल्याणदीक्षोत्सवपर्वणां ते,
भविष्यति क्षेममथो विधानात् ॥ ८२१ ॥

दीक्षादिनत्यागिकसंस्मृतौ ते,
जना भविष्यन्ति च वीतरागाः ।
यात्रा च ते कार्तिकपूर्णिमायां,
भक्तैः कृता तेन हि पर्व जातम् ॥ ८२२ ॥

तस्माद्दिनाद्यात्रिकपर्व जातं,
तस्मिन्कृतेऽनन्तसुखप्रदं तत् ।
दिश्युत्तरस्यां मनुजास्त्रियश्च,
महाप्रभुं त्वां सममानयन्त ॥ ८२३ ॥

सुखप्रदं फाल्गुनपूर्णिमायां,
पर्वाऽभवत्तेन गुणाकरस्तत् ।
जज्वाल वह्निः प्रसभं प्रसन्नो-
विभो जगच्छीतनिवारणार्थम् ॥ ८२४ ॥

गास्यन्ति गानं तत एव लोका-
स्त्वद्भक्तिभिश्चैकलया विभूय ।
देवा महावीरसुनाम चक्रुः,
श्रीमार्गशीर्षस्य च पूर्णिमायाम् ॥ ८२५ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कृष्णाष्टमी याऽस्ति च चैत्रमासे,
सा वर्द्धमानाभिधरम्यपर्व ।
माघस्य कृष्णेतरपंचमी या,
पर्वास्ति यस्यां गतगर्व इन्द्रः ॥ ८२६ ॥
माता निजं दोहदमाशु जिग्ये,
तस्माच्च पर्वाऽस्ति परं पवित्रम् ।
लग्नस्य वारोऽपि महर्द्धिपर्व,
वध्वा वरस्याऽपि सुखाय धाम ॥ ८२७ ॥
ऋतोर्वसन्तस्य च पंचमी या,
सर्वत्र विश्वेषु सुखप्रदा सा ।
शुक्लाश्विने श्रीदशमी तिथि र्या,
पूजा महावीर तवाविरासीत् ॥ ८२८ ॥
त्वन्नामतो भाविजयोत्सवोऽपि,
त्वज्जापतो नश्यति पातकौघः ।
शुक्लाश्विनस्यास्ति शुभाष्टमी या,
तस्यां च देवी त्रिशला बभूव ॥ ८२९ ॥
पूजा भविष्यन्ति जगत्सु देव्याः,
पूज्या भविष्यन्ति जगत्सु सत्यः ।
भावीनि भूतानि च यद्भवतानि,
श्रीमन्निमित्तानि च तानि सन्ति ॥ ८३० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सुखं कृते पर्वमहोत्सवे च,
श्रीजक्तदुःखानि विनाशयेत्सः ।
एकाग्रबुद्ध्या तपसा व्रतेन,
ध्यानं तत्राकारि यशोदयाऽपि ॥ ८३१ ॥
आषाढमासस्य वरव्रतानि,
बाला विधास्यन्ति विनोदयुक्ताः ।
प्रभो महावीर विभो दयालो,
पदे पदे मंगलमातनोतु ॥ ८३२ ॥
ऋद्धिं च सिद्धिं च सुखं करोतु,
त्वन्नामतः सिद्धिरहो नितान्तम् ।
त्वन्नामतो भूमितले मनुष्याः
शान्तिं च पुष्टिं च सदा लभन्ते ॥ ८३३ ॥
लक्ष्मीं लजन्ते ध्रुवमत्र ये त्वां,
गायन्ति शृण्वन्ति तथा पठन्ति ।
शान्तिर्जवेत्तुष्टिरथापि पुष्टि-
र्जगत्सु जैनाः सुखिनो जवन्तु ॥ ८३४ ॥

इतिश्री सुदर्शनासुबोधः समाप्तः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

શ્રી યશો

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com